मम्मटविरचितः

# काव्यप्रकाशः

प्रथमद्वितीयतृतीयदशमोल्लासः

2036
काव्य

REFBK-0016964
REFBK-0016964

महाराष्ट्र ग्रंथ भांडार, कोल्हापूर.

मराठी ग्रंथ संग्रहालय, ठाणे.

मम्मट विरचित:

# काव्य प्रकाश:

पुणे विद्यापीठाच्या द्वितीय वर्ष बी. ए. साठी

प्रथमद्वितीयतृतीयदशमोल्लासाः

REFBK-0016964

महाराष्ट्र ग्रंथ भांडार, कोल्हापूर.

प्रकाशक :
गोविंद वामन कुलकर्णी,
महाराष्ट्र ग्रंथ भांडार,
महाद्वार रस्ता, कोल्हापूर

सप्टेंबर १९६८

मूल्य : २ रुपये

मुद्रक :
गोविंद वामन कुलकर्णी,
सेवा मुद्रणालय, १६७ बी,
विद्यापीठ रस्ता, कोल्हापूर

# काव्य-प्रकाश—

काश्मिरातील ' मम्मट ' या सुप्रसिद्ध लेखकाने ( ११ वे शतक ) हा अलंकार-शास्त्रातील प्रमाणभूत ग्रंथ संस्कृत भाषेत लिहिला. मम्मट हा एक मान्यवर पंडित असून त्याने आपल्या अलौकिक प्रतिभेने आणि अगाध विद्वत्तेने हा ग्रंथ रचला. संस्कृत अलंकारशास्त्रात याचे स्थान अद्वितीय असून तो अत्यंत लोकप्रिय झाला आहे. या ग्रंथावर भाष्य लिहिणे हे स्वतःच्या विद्वत्तेचे एक प्रमाण पूर्वी मानले जाई व भाष्यकार ' भट्ट ' अशी मानाची पदवी लावी. ' साहित्यदर्पण ' लिहिणाऱ्या व वेळप्रसंगी मम्मटाच्या मतांवर टीका करणाऱ्या विश्वनाथाने ' काव्य-प्रकाशा'वर स्वतः भाष्य लिहिले आहे. या ग्रंथाला हे महत्त्व प्राप्त होण्याचे मुख्य कारण हे की यात अलंकारशास्त्रात त्याच्यापूर्वी आलेले महत्त्वाचे सिद्धांत समाविष्ट केले आहेत. तसेच या सर्वांची पद्धतशीर मांडणी केली असून एक स्वतःस मान्य अशी व्यवस्थाही त्यात लावली आहे. पांडित्याबरोबर मौलिकतेचा स्पर्शही या ग्रंथाला झाला आहे. या ग्रंथाची भाषाशैली भारदस्त व सघन असून बहुधा प्रसन्न पण क्वचित क्लिष्ट अशी आहे. या ग्रथांत कुठल्याही एकाच विचारशाखेचा ( School of thought ) परामर्ष व पाठपुरावा केला नसून सर्वांचा समन्वय त्यात साधला आहे. ग्रंथाच्या शीर्षकात म्हटल्याप्रमाणे काव्याच्या म्हणजे ललितवाङ्मयाच्या स्वरूपावर आणि अंगोपांगांवर या ग्रंथात प्रकाश टाकला आहे. आणि त्याचे सर्वांगीण स्वरूप रसिकांपुढे व अभ्यासकांपुढे सादर केले आहे. या भरघोस ग्रंथात अपरिहार्यपणे काही दोषही राहिले आहेत. उदाहरणार्थ— उदाहरणे देतांना ती मुख्यतः शृंगाररसाची किंवा राजवर्णनाचीच आहेत. काही ठिकाणी लेखनात अशास्त्रीयताही डोकावते. जो विषय अद्याप चर्चिला नाही त्याचाही अगोदर उल्लेख आला आहे. सामान्य वाचकाची त्यामुळे कुचंबणा होते. पण अशी स्थळे थोडी आहेत.

या ग्रंथाचे एकूण दहा 'उल्लास' ' ( अध्याय ) असून कारिका, वृत्ति ( भाष्य ) आणि उदाहरणे अशी त्रिविध मांडणी त्यात अवलंबिलेली आहे. पहिल्या उल्लासात वाग्देवी सरस्वती हिचे प्रथम नमन केले असून काव्याची ( ललित साहित्याची ) प्रयोजने, काव्याच्या व्याख्या व त्याचे त्याच्या दर्जावरून केलेले तीन प्रकार सांगितले आहेत. हे प्रकार म्हणजे ( १ ) उत्तम काव्य ( याला ' ध्वनिकाव्य ' असे ही म्हणतात. ) ( २ ) मध्यम काव्य ( याला गुणीभूतव्यङ्ग्य असे नाव आहे. ) व ( ३ ) अधम काव्य ( याला 'शब्दचित्र' किंवा ' वाच्यचित्र ' असे म्हटले जाते. )

दुसऱ्या उल्लासापासून दहाव्या उल्लासाअखेर काव्याच्या व्याख्येतल्या प्रत्येक शब्दाचे शास्त्रीय दृष्ट्या सांगोपांग विवरण केले आहे. दुसऱ्यात शब्द व त्याच्या ( १ ) अभिधा ( २ ) लक्षणा आणि ( ३ ) व्यंजना ( शाब्दी ) याचा विचार केला आहे. तिसऱ्यात आर्थी व्यंजना व व्यंग्यार्थ प्रकट होण्यासाठी कोणकोणत्या उपाधी असाव्या लागतात याचे उदाहरणांसह विवेचन केले आहे. चवथ्यात उत्तम ( ध्वनि ) काव्याचे दोन प्रकार व त्यांचे पोटभेद सांगितले असून रसाचे स्वरूप विशद केले आहे. रससंबंधी विविध उपपत्ती येथे दिल्या आहेत. व त्यांची चर्चा केली आहे. शिवाय आठ रस, स्थायिभाव, तेहतीस व्यभिचारिभाव, नववा शांतरस, भाव, रसाभास, भावाभास आणि ध्वनीचे पोटविभाग यांचेही प्रतिपादन केले आहे. पांचव्या उल्लासात मध्यम-काव्य आणि त्याचे आठ प्रकार सांगितले आहेत. सहाव्यात अधम काव्य आणि त्याचे दोन विभाग वर्णिले असून सातव्यात दोषांची व्याख्या, शब्दांचे सोळा दोष, वाक्याचे दोष, अर्थाचे तेहतीस दोष, रसाचे तेरा दोष उदाहरणांसह स्पष्ट केले आहेत. आठव्यात गुणांची व्याख्या, अलंकाराची व्याख्या, तीन गुण व त्यांची चर्चा समाविष्ट केली आहे. नवव्यात सहा शब्दालंकार आणि तीन रीती चर्चिल्या आहेत, आणि दहाव्यात बासष्ट अर्थालंकारांची उदाहरणांसह सविस्तर चर्चा केली आहे. सारांश, नाट्यशास्त्राखेरीज अलंकार-शास्त्रात नेहमी येणाऱ्या बहुतेक सर्व विषयांचा परामर्ष येथे समर्थपणे घेतला असल्यामुळे पुढील साहित्यशास्त्रज्ञांस व अभ्यासकांस हा ग्रंथ दीपस्तंभाप्रमाणे मार्गदर्शक झाला आहे. संस्कृत साहित्यशास्त्राचा ज्याला अभ्यास करायचा आहे अशा आधुनिकालाही हा ग्रंथ अभ्यासणे आवश्यक आहे.

कोल्हापूर

— गं. वि. कुलकर्णी

## - प्रा स्ता वि क -

पुणे विद्यापीठाच्या चालू अभ्यासक्रमानुसार **'काव्य-प्रकाश'** या मम्मटाचार्यांच्या ग्रंथातील पहिला उल्लास, दुसरा उल्लास, तिसरा उल्लास व दहावा उल्लास, यांचा समावेश या पुस्तकात केला आहे. यातील मूळसंहिता (पाठ भेदांसह) कै. प्रा. अ. वा. गजेंद्रगडकर यांच्या, पाप्युलर बुक डेपो, मुंबई ७, यांनी १९५९ मध्ये प्रकाशित केलेल्या मूळ संहितेवरून घेतली आहे. अर्थातच त्या प्रतीतले मुद्रणदोष गाळले आहेत व ती शक्यतो शुद्ध ठेवण्याचा प्रयत्न केला आहे.

पुणे विद्यापीठाच्या द्वितीय वर्षाच्या विद्यार्थ्यांची या प्रकाशनाने थोडी सोय होईल अशी आशा वाटते.

**-प्रकाशक**

# शुद्धि-पत्रक

| | अशुद्ध | शुद्ध |
|---|---|---|
| पृष्ठ १८ श्लोक ३ | शौरिभुजै० | शौरिर्भुजै० |
| पृ. २४ श्लोक ३० | ब्दीपाद् | द्वीपाद् |
| पृ. २४ श्लोक ३० खालील ओळ २ | साधक साधकमस्ती० | साधकमस्ती० |
| पृ. २९ श्लोक ४९ | राजस्सुता | राजसुता |
| पृ. ३६ शेवटची ओळ | बक्ष्यमाण | वक्ष्यमाण |
| पृ. ४० श्लोक. १०१ | पश्चादग्नी | पश्चादग्नी |
| ,, | त्रिकनतिविततंः | त्रिकनतिविततं |
| पृ. ५० कारिका ३६ | सूक्ष्मोऽप्यर्थौ | सूक्ष्मोऽप्यर्थो |
| पृ. ५२ कारिका ४० | क्रियाफलावाप्तिनवानैर्थश्च | क्रियाफलावाप्तिनैवानर्थश्च |
| पृ. ५३ श्लोक १५२ | युगान्तकालप्रात० | युगान्तकालप्रति० |
| पृ. ५६ का.४७खालील पहिली ओळ | वोदु | वोढुं |
| पृ. ५८ श्लोक १६७ खाली | प्रतीतत्वात्तत्य | प्रतीतत्वात्तस्य |
| पृ. ६२ श्लोक १७९ खाली | प्रभूतचमत्क्रातनामत्तामत्य० | प्रभूतचमत्कृतिनिमित्तमित्य० |

'देवी हि सरस्वती स्वयमभूत् काश्मीरदेशे पुमान् । '

मूळ संहिता

# काव्यप्रकाशः

## प्रथम उल्लासः

### मङ्गलम्

ग्रन्थारम्भे विघ्नविघाताय समुचितेष्टदेवतां ग्रन्थकृत् परामृशति—

नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम् ।
नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति ॥१॥

नियतिशक्त्या नियतरूपा, सुखदुःखमोहस्वभावा, परमाण्वाद्युपादानकर्मादिसहकारिकारणपरतन्त्रा, षड्रसा, न च हृद्यैव तैः, तादृशी ब्रह्मणो निर्मितिर्निर्माणम्, एतद्विलक्षणा तु कविवाङ्निर्मितिः । अत एव जयति । जयत्यर्थेन च नमस्कार आक्षिप्यते इति तां प्रति अस्मि प्रणत इति लभ्यते ।

### काव्यप्रयोजनानि

इहाभिधेयं सप्रयोजनमित्याह—

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासंमिततयोपदेशयुजे ॥२॥

कालिदासादीनामिव यशः, श्रीहर्षादेर्बाणादीनामिव धनम्, राजादिगतोचिताचारपरिज्ञानम्, आदित्यादेर्मयूरादीनामिवानर्थनिवारणम्, सकलप्रयोजनमौलिभूतं समनन्तरमेव रसास्वादनसमुद्भूतं विगलितवेद्यान्तरमानन्दम्, प्रभुसंमितशब्दप्रधानवेदादिशास्त्रेभ्यः सुहृत्संमितार्थतात्पर्यवत्पुराणादीतिहासेभ्यश्च

---

१ 'धावकादीना॰' इति पाठः प्रायः सर्वेषु मुद्रितपुस्तकेषु ।

शब्दार्थयोर्गुणभावेन रसाङ्गभूतव्यापारप्रवणतया विलक्षणं यत् काव्यं लोकोत्तरवर्णनानिपुणकविकर्म, तत् कान्तेव सरसतापादनेनाभिमुखीकृत्य, रामादिवद्वर्तितव्यं न रावणादिवदित्युपदेशं च यथायोगं कवेः सहृदयस्य च करोतीति सर्वथा तत्र यतनीयम् ।

## काव्यहेतुः

एवमस्य प्रयोजनमुक्त्वा कारणमाह—

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात् ।
काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे ॥३॥

शक्तिः कवित्वबीजरूपः संस्कारविशेषः यां विना काव्यं न प्रसरेत् प्रसृतं वा उपहसनीयं स्यात् । लोकस्य स्थावरजङ्गमात्मकलोकवृत्तस्य, शास्त्राणां छन्दोव्याकरणाभिधानकोशकलाचतुर्वर्गगजतुरगखाङ्गादिलक्षणग्रन्थानाम्, काव्यानां च महाकविनिबन्धानाम्, आदिग्रहणादितिहासादीनां च विमर्शनाद् व्युत्पत्तिः। काव्यं कर्तुं विचारयितुं च ये जानन्ति तदुपदेशेन करणे योजने च पौनःपुन्येन प्रवृत्तिरिति त्रयः समुदिताः, न तु व्यस्ताः, तस्य काव्यस्योद्भवे निर्माणे समुल्लासे च हेतुः, न तु हेतवः ।

## काव्यलक्षणम्

एवमस्य कारणमुक्त्वा स्वरूपमाह—

तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि ।

दोषगुणालंकारा वक्ष्यन्ते । क्वापीत्यनेनैतदाह–यत् सर्वत्र सालंकारौ, क्वचित् तु स्फुटालंकारविरहेऽपि न काव्यत्वहानिः । यथा—

यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपा-
स्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः ।
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ
रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते ॥१॥

---

१ 'महाकविसंबन्धिनाम्' इत्यपि पाठः

अत्र स्फुटो न कश्चिदलंकारः रसस्य हि प्राधान्यान्नालंकारता। तद्भेदान् क्रमेणाह—

ध्वन्यपरनामकोत्तमकाव्यलक्षणम्

इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद्, ध्वनिर्बुधैः कथितः ॥४॥

इदमिति काव्यम्। बुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यङ्ग्य-व्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः। अतस्तन्मतानुसारिभिरन्यैरपि न्यग्भावितवाच्यव्यङ्ग्यव्यञ्जनक्षमस्य शब्दार्थ-युगलस्य। यथा—

निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो
नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः।
मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमे
वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम् ॥ २ ॥

अत्र तदन्तिकमेव रन्तुं गतासीति प्राधान्येनाधमपदेन व्यज्यते।

गुणीभूतव्यङ्ग्यापरनामकमध्यमकाव्यलक्षणम्

अतादृशि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम्।

अतादृशि वाच्यादनतिशयिनि। यथा—

ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरीसनाथकरम्।
पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया ॥ ३ ॥

अत्र वञ्जुललतागृहे दत्तसंकेता नागतेति व्यङ्ग्यं गुणीभूतम्। तदपेक्षया वाच्यस्यैव चमत्कारित्वात्।

अव्यङ्ग्यापरनामकाधमकाव्यलक्षणम्

शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम् ॥५॥

चित्रमिति गुणालंकारयुक्तम्। अव्यङ्ग्यमिति स्फुटप्रतीयमानार्थ-रहितम्। अवरम् अधमम्। यथा—

स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतराम्बुच्छटा-
मूर्च्छन्मोहमहर्षिहर्षविहितस्नानाह्निकाह्लाय वः ।
भिद्यादुद्यदुदारदर्दुरदरी दीर्घादरिद्रुम-
द्रोहोद्रेकमहोर्मिमेदुरमदा मन्दाकिनी मन्दताम् ॥ ४ ॥

विनिर्गतं मानदमात्ममन्दिराद्
भवत्युपश्रुत्य यदृच्छयापि यम् ।
ससंभ्रमेन्द्रद्रुतपातितार्गला
निमीलिताक्षीव भियामरावती ॥५॥

इति काव्यप्रकाशे काव्यप्रयोजनकारणस्वरूपविशेषनिर्णयो नाम प्रथम उल्लासः ॥१॥

---o---

# द्वितीय उल्लासः

क्रमेण शब्दार्थयोः स्वरूपमाह—

त्रिविधः शब्दः

स्याद् वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा।

अत्रेति काव्ये। एषां स्वरूपं वक्ष्यते।

वाच्यादयस्तदर्थाः स्युः

वाच्यलक्ष्यव्यङ्ग्याः।

तात्पर्यार्थः

तात्पर्यार्थोऽपि केषुचित् ॥१॥

आकाङ्क्षा-योग्यता-सन्निधि-वशाद् वक्ष्यमाणस्वरूपाणां पदार्थानां समन्वये तात्पर्यार्थो विशेषवपुरपदार्थोऽपि वाक्यार्थः समुल्लसति-इत्यभिहितान्वयवादिनां मतम्। वाच्य एव वाक्यार्थः -इत्यन्विताभिधानवादिनः।

सर्वेऽर्थाः व्यञ्जकाः

सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वमपीष्यते।

तत्र वाच्यस्य यथा—

माए घरोवअरणं अज्ज हु नत्थि त्ति साहिअं तुमए।
ता भण किं करणिज्जं एमेअ ण वासरो ठाई ॥१॥

[मातर्गृहोपकरणमद्य खलु नास्तीति साधितं त्वया।
तद् भण किं करणीयमेवमेव न वासरः स्थायी ॥]

अत्र स्वैरविहारार्थिनीति व्यज्यते।

लक्ष्यस्य यथा —

साहेन्ती सहि सुहअं खणे खणे दूम्मिआसि मज्झकए ।
सुब्भावणेहकरणिज्जसरिसअं दाव विरइअं तुमए ॥२॥

[साधयन्ती सखि सुभगं क्षणे क्षणे दूनासि मत्कृते ।
सद्भावस्नेहकरणीयसदृशं तावद् विरचितं त्वया ॥]

अत्र मत्प्रियं रमयन्त्या त्वया शत्रुत्वमाचरितमिति लक्ष्यम् । तेन च कामुकविषयं सापराधत्वप्रकाशनं व्यङ्ग्यम् ।

व्यङ्ग्यस्य यथा —

उअ णिच्चलणिप्पंदा भिसिणीपत्तमि रेहइ बलाआ ।
णिम्मलमरगभभाअणपरिट्ठिआ सङ्खसुत्ति व्व ॥३॥

[पश्य निश्चलनिष्पन्दा बिसिनीपत्रे राजते बलाका ।
निर्मलमरकतभाजनपरिस्थिता शङ्खशुक्तिरिव ॥]

अत्र निष्पन्दत्वेन आश्वस्तत्वम् । तेन च जनरहितत्वम् । अतः संकेतस्थानमेतादिति कयाचित् कंचित् प्रत्युच्यते । अथवा, मिथ्या वदसि, न त्वमत्रागतोऽभूरिति व्यज्यते ।

वाचकादीनां क्रमेण स्वरूपमाह —

### वाचकशब्दलक्षणम्

**साक्षात् संकेतितं योऽर्थमभिधत्ते स वाचकः ॥२॥**

इहागृहीतसंकेतस्य शब्दस्यार्थप्रतीतेरभावात् संकेतसहाय एव शब्दोऽर्थविशेषं प्रतिपादयतीति यस्य यत्राव्यवधानेन संकेतो गृह्यते स तस्य वाचकः ।

### संकेतविषये मतद्वयम्

**संकेतितश्चतुर्भेदो जात्यादिर्जातिरेव वा ।**

यद्यप्यर्थक्रियाकारितया प्रवृत्तिनिवृत्तियोग्या व्यक्तिरेव, तथापि आनन्त्याद् व्यभिचाराच्च तत्र संकेतः कर्तुं न युज्यते इति, गौः शुक्लश्चलो डित्थः इत्यादीनां शब्दानां विषयविभागो न प्राप्नोति इति च, तदुपाधावेव संकेतः ।

१. 'इहागृहीतसंकेतस्य पुरुषस्य शब्दार्थविशेषप्रतिपत्तेरभावात्' इत्यपि पाठः ।

उपाधिश्च द्विविधः- वस्तुधर्मो वक्तृयदृच्छासंनिवेशितश्च । वस्तुधर्मोऽपि द्विविधः–सिद्धः साध्यश्च । सिद्धोऽपि द्विविधः– पदार्थस्य प्राणप्रदो विशेषाधानहेतुश्च । तत्राद्यो जातिः । उक्तं हि वाक्यपदीये 'गौः स्वरूपेण न गौः, नापि अगौः, गोत्वाभि-संबन्धात् तु गौः ' इति । द्वितीयो गुणः । शुक्लादिना हि लब्ध-सत्ताकं वस्तु विशिष्यते । साध्यः पूर्वापरीभूतावयवक्रियारूपः डित्थादिशब्दानामन्त्यबुद्धिनिर्ग्राह्यं संहृतक्रमं स्वरूपं वक्त्रा यदृच्छया डित्थादिष्वर्थेषूपाधित्वेन संनिवेश्यते इति सोऽयं संज्ञारूपो यदृच्छात्मक इति । गौः शुक्लश्चलो डित्थः इत्यादौ 'चतुष्टयी शब्दानां प्रवृत्तिः ' इति महाभाष्यकारः ।

परमाण्वादीनां तु गुणमध्यपाठात् पारिभाषिकं गुणत्वम् । गुणक्रियायदृच्छानां[1] वस्तुत एकरूपाणामप्याश्रयभेदात् भेद इव लक्ष्यते यथैकस्य मुखस्य खड्गमुकुरतैलाद्यालम्बनभेदात् ।

हिमपयःशङ्खाद्याश्रयेषु परमार्थतो भिन्नेषु शुक्लादिषु यद्वशेन शुक्लः शुक्लः इत्याद्यभिन्नाभिधानप्रत्ययोत्पत्तिस्तत् शुक्लत्वादि सामान्यम् । गुडतण्डुलादिपाकादिष्वेवमेव पाकत्वादि । बाल-वृद्धशुकाद्युदीरितेषु डित्थादिशब्देषु च, प्रतिक्षणं भिद्यमानेषु डित्थाद्यर्थेषु वा, डित्थत्वाद्यस्तीति सर्वेषां शब्दानां जातिरेव प्रवृत्तिनिमित्तमित्यन्ये । तद्वान् अपोहो वा शब्दार्थः कैश्चिदुक्तः इति ग्रन्थगौरवभयात् प्रकृतानुपयोगाच्च न दर्शितम् ।

### अभिधालक्षणम्

स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते ॥३॥

स इति साक्षात्संकेतितः । अस्येति शब्दस्य ।

### लक्षणालक्षणम्

मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात् ।
अन्योऽर्थो लक्ष्यते यत् सा लक्षणारोपिता क्रिया ॥४॥

---

१. 'गुणक्रियायदृच्छाशब्दानाम्' इत्यपि पाठः ।

'कर्मणि कुशलः' इत्यादौ दर्भग्रहणाद्ययोगात् 'गङ्गायां घोषः' इत्यादौ च गङ्गादीनां घोषाद्यधिकरणत्वासंभवात् मुख्यार्थस्य बाधे, विवेचकत्वादौ सामीप्ये च संबन्धे, रूढितः प्रसिद्धेः, तथा 'गङ्गातटे घोषः' इत्यादेः प्रयोगाद् येषां न तथा प्रतिपत्तिः तेषां शैत्यपावनत्वादीनां धर्माणां तथाप्रतिपादनात्मनः प्रयोजनाच्च, मुख्येन अमुख्योऽर्थो लक्ष्यते यत् स आरोपितः शब्दव्यापारः सान्तरार्थनिष्ठो लक्षणा ।

शुद्धायाः लक्षणायाः द्वौ भेदौ

स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणम् ।
उपादानं लक्षणं चेत्युक्ता शुद्धैव सा द्विधा ॥५॥

'कुन्ताः प्रविशन्ति' 'यष्टयः प्रविशन्ति' इत्यादौ कुन्तादिभिरात्मनः प्रवेशसिद्ध्यर्थं स्वसंयोगिनः पुरुषा आक्षिप्यन्ते, तत उपादानेनेयं लक्षणा ।

'गौरनुबन्ध्यः' इत्यादौ 'श्रुतिचोदितमनुबन्धनं कथं मे स्याद्' इति जात्या व्यक्तिराक्षिप्यते, न तु शब्देनोच्यते 'विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे' इति न्यायाद्-इत्युपादानलक्षणा तु नोदाहर्तव्या । न ह्यत्र प्रयोजनमस्ति । न वा रूढिरियम् । व्यक्त्यविनाभावित्वात् तु जात्या व्यक्तिराक्षिप्यते, यथा क्रियतामित्यत्र कर्ता, कुर्वित्यत्र कर्म । 'प्रविश' 'पिण्डीम्' इत्यादौ 'गृहं' 'भक्षय' इत्यादि च ।

'पीनो देवदत्तो दिवा न भुङ्क्ते' इत्यत्र च रात्रिभोजनं न लक्ष्यते । श्रुतार्थापत्तेरर्थापत्तेर्वा तस्य विषयत्वात् ।

'गङ्गायां घोषः' इत्यत्र तटस्य घोषाधिकरणत्वसिद्धये गङ्गाशब्दः स्वार्थमर्पयति इत्येवमादौ लक्षणेनैषा लक्षणा । उभयरूपा चेयं शुद्धा । उपचारेणामिश्रितत्वात् ।

अनयोर्भेदयोर्लक्ष्यस्य लक्षकस्य च न भेदरूपं ताटस्थ्यम् । तटादीनां गङ्गादिशब्दैः प्रतिपादने तत्त्वप्रतिपत्तौ हि प्रतिपिपादयिषितप्रयोजनसंप्रत्ययः । गङ्गासंबन्धमात्रप्रतीतौ तु गङ्गातटे घोष इति मुख्यशब्दाभिधानाल्लक्षणायाः को भेदः ।

सारोपायाः लक्षणायाः लक्षणम्

सारोपान्या तु यत्रोक्तौ विषयी विषयस्तथा ।

आरोप्यमाणः आरोपविषयश्च यत्रानपह्नुतभेदौ सामानाधिकरण्येन निर्दिश्येते सा लक्षणा सारोपा ।

साध्यवसानिकायाः लक्षणायाः लक्षणम्

विषय्यन्तःकृतेऽन्यस्मिन् सा स्यात् साध्यवसानिका ॥६॥

विषयिणारोप्यमाणेनान्तःकृते निगीर्णे अन्यस्मिन्नारोपविषये सति सा साध्यवसाना स्यात् ।

इमौ भेदौ गौणौ शुद्धौ च

भेदाविमौ च सादृश्यात् संबन्धान्तरतस्तथा ।
गौणौ शुद्धौ च विज्ञेयौ

इमावारोपाध्यवसानरूपौ सादृश्यहेतू भेदौ 'गौर्वाहीकः' इत्यत्र 'गौरयम्' इत्यत्र च ।

अत्र हि स्वार्थसहचारिणो गुणा जाड्यमान्द्यादयो लक्ष्यमाणा अपि गोशब्दस्य परार्थाभिधाने प्रवृत्तिनिमित्तत्वमुपयान्ति इति केचित् । स्वार्थसहचारिगुणाभेदेन परार्थगता गुणा एव लक्ष्यन्ते न तु परार्थोऽभिधीयते इत्यन्ये । साधारणगुणाश्रयत्वेन परार्थ एव लक्ष्यते इत्यपरे ।

उक्तं चान्यत्र—'अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते । लक्ष्यमाणगुणैर्योगाद् वृत्तेरिष्टा तु गौणता' इति ।

अविनाभावोऽत्र संबन्धमात्रं, न तु नान्तरीयकत्वम् । तत्त्वे हि 'मञ्चाः क्रोशन्ति' इत्यादौ लक्षणा न स्यात् । अविनाभावे चाक्षेपेणैव सिद्धेर्लक्षणाया नोपयोग इत्युक्तम् ।

'आयुर्घृतम्' 'आयुरेवेदम्' इत्यादौ सादृश्यादन्यत् कार्यकारणभावादि संबन्धान्तरम् । एवमादौ च कार्यकारणभावादिलक्षणपूर्वे आरोपाध्यवसाने ।

अत्र गौणभेदयोर्भेदेऽपि ताद्रूप्यप्रतीतिः सर्वथैवाभेदावगमश्च प्रयोजनम् । शुद्धभेदयोस्तु अन्यवैलक्षण्येन अव्यभिचारेण च कार्यकारित्वादि ।

क्वचित् तादर्थ्यादुपचारः । यथा इन्द्रार्था स्थूणा इन्द्रः । क्वचित् स्वस्वामिभावसंबन्धात् । यथा राजकीयः पुरुषो राजा । क्वचिदवयवावयविभावात् । यथा अग्रहस्तः इत्यत्र अग्रमात्रेऽवयवे हस्तः । क्वचित् तात्कर्म्यात् । यथा अतक्षा तक्षा ।

लक्षणा तेन षड्विधा ॥७॥

आद्यभेदाभ्यां सह ।

सा च

प्रकारान्तरेण लक्षणायाः भेदत्रयम् ।

व्यङ्ग्येन रहिता रूढौ, सहिता तु प्रयोजने ।

प्रयोजनं हि व्यञ्जनव्यापारगम्यमेव ।

तच्च गूढमगूढं वा

तच्चेति व्यङ्ग्यम् । गूढं यथा—

मुखं विकसितास्मितं वशितवक्रिम प्रेक्षितं
समुच्छलितविभ्रमा गतिरपास्तसंस्था मतिः ।
उरो मुकुलितस्तनं जघनमंसबन्धोद्धुरं
बतेन्दुवदनातनौ तरुणिमोद्गमो मोदते ॥ ४ ॥

अगूढं यथा—

श्रीपरिचयाज्जडा अपि भवन्त्यभिज्ञा विदग्धचरितानाम् ।
उपदिशति कामिनीनां यौवनमद एव ललितानि ॥ ५ ॥

अत्र 'उपदिशति' इत्यत्र अनायासेन शिक्षणं अभिधेयवत् स्फुटं प्रतीयते ।

तदेषा कथिता त्रिधा ॥८॥

अव्यङ्ग्या गूढव्यङ्ग्या अगूढव्यङ्ग्या चेति ।

लाक्षणिकशब्दलक्षणम्

तद्भूर्लाक्षणिकः

शब्द इति संबध्यते। तद्भूस्तदाश्रयः।

तत्र व्यापारो व्यञ्जनात्मकः।

लक्षणामूलव्यञ्जनायाः लक्षणम्

कुत इत्याह—

यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते ॥९॥

फले शब्दैकगम्येऽत्र व्यञ्जनान्नापरा क्रिया।

प्रयोजनप्रतिपिपादयिषया यत्र लक्षणया शब्दप्रयोगस्तत्र नान्यतस्तत्प्रतीतिः, अपि तु तस्मादेव शब्दात्। न चात्र व्यञ्जनादृतेऽन्यो व्यापारः।

व्यञ्जनायाः आवश्यकता

तथाहि—

नाभिधा समयाभावात्

गङ्गायां घोषः इत्यादौ ये पावनत्वादयो धर्मास्तटादौ प्रतीयन्ते न तत्र गङ्गादिशब्दाः संकेतिताः।

हेत्वभावान्न लक्षणा ॥१०॥

तथा च

मुख्यार्थबाधादित्रयं हेतुः।

लक्ष्यं न मुख्यं, नाप्यत्र बाधो, योगः फलेन नो।
न प्रयोजनमेतस्मिन्, न च शब्दः स्खलद्गतिः ॥११॥

यथा गङ्गाशब्दः स्रोतसि सबाध इति तटं लक्षयति, तद्वत् यदि तटेऽपि सबाधः स्यात्, तदा प्रयोजनं लक्षयेत्। न च तटं मुख्योऽर्थः। नाप्यत्र बाधः। न च गङ्गाशब्दार्थस्य तटस्य पावनत्वाद्यैर्लक्षणीयैः संबन्धः। नापि प्रयोजने लक्ष्ये किंचित् प्रयोजनम्। नापि गङ्गाशब्दस्तटमिव प्रयोजनं प्रतिपादयितुमसमर्थः।

एवमप्यनवस्था स्याद् या मूलक्षयकारिणी ।

एवमपीति प्रयोजनं चेल्लक्ष्यते, तत् प्रयोजनान्तरेण, तदपि प्रयोजनान्तरेण, इति प्रकृतप्रतीतिकृत् अनवस्था भवेत् ।

विशिष्टलक्षणा न युक्ता

ननु पावनत्वादिधर्मयुक्तमेव तटं लक्ष्यते, 'गङ्गायास्तटे घोषः' इत्यतोऽधिकस्यार्थस्य प्रतिपत्तिश्च प्रयोजनमिति विशिष्टे लक्षणा । तत् किं व्यञ्जनयेत्यत आह—

प्रयोजनेन सहितं लक्षणीयं न युज्यते ॥१२॥

कुत इताह—

ज्ञानस्य विषयो ह्यन्यः फलमन्यदुदाहृतम् ।

प्रत्यक्षादेर्नीलादिर्विषयः फलं तु प्रकटता संवित्तिर्वा ।

विशिष्टे लक्षणा नैवम्

निगदेनैव व्याख्यातम् ।

विशेषाः स्युस्तु लक्षिते ॥१३॥

तटादौ ये विशेषाः पावनत्वादयस्ते चाभिधातात्पर्यलक्षणाभ्यो व्यापारान्तरेण गम्याः । तच्च व्यञ्जनध्वननद्योतनादिशब्दवाच्यमवश्यमेषितव्यम् । एवं लक्षणामूलं व्यञ्जकत्वमुक्तम् ।

अभिधामूलव्यञ्जनायाः लक्षणम्

अभिधामूलं त्वाह—

अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते ।
संयोगाद्यैरवाच्यार्थधीकृद् व्यापृतिरञ्जनम् ॥१४॥

संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य संनिधिः ॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥ '

इत्युक्तदिशा

सशङ्खचक्रो हरिः, अशङ्खचक्रो हरिरित्यच्युते। रामलक्ष्मणाविति दाशरथौ रामार्जुनगतिस्तयोरिति भार्गवकार्तवीर्ययोः। स्थाणुं भज भवच्छिदे इति हरे। सर्वं जानाति देव इति युष्मदर्थे। कुपितो मकरध्वज इति कामे। देवस्य पुरारातेरिति शंभौ। मधुना मत्तः कोकिलः इति वसन्ते। पातु वो दयितामुखमिति सांमुख्ये। भात्यत्र परमेश्वरः इति राजधानीरूपाद् देशाद् राजनि। चित्रभानुर्विभातीति दिने रवौ, रात्रौ वह्नौ। मित्रं भातीति सुहृदि, मित्रो भातीति रवौ। इन्द्रशत्रुरित्यादौ वेदे एव, न काव्ये, स्वरोऽर्थविशेषप्रतीतिकृत्।

आदिग्रहणात्

एद्दहमेत्तत्थणिआ एद्दहमेत्तेहिँ अच्छिवत्तेहिँ।
एद्दहमेत्तावत्था एद्दहमेत्तेहिँ दिअएहिँ ॥६॥
(एतावन्मात्रस्तनिका एतावन्मात्राभ्यामक्षिपत्राभ्याम्।
एतावन्मात्रावस्था एतावन्मात्रैर्दिवसैः।)

इत्यादावभिनयादयः।

इत्थं संयोगादिभिरर्थान्तराभिदायकत्वे निवारितेऽप्यनेकार्थस्य शब्दस्य यत् क्वचिदर्थान्तरप्रतिपादनं तत्र नाभिधा। नियमनात् तस्याः। न लक्षणा। मुख्यार्थबाधाद्यभावात्। अपि त्वञ्जनं व्यञ्जनमेव व्यापारः। यथा—

भद्रात्मनो दुरधिरोहतनोर्विशाल—
वंशोन्नतेः कृतशिलीमुखसंग्रहस्य।
यस्यानुपप्लुतगतेः परवारणस्य।
दानाम्बुसेकसुभगः सततं करोऽभूत् ॥७॥

व्यञ्जकशब्दलक्षणम्

**तद्युक्तो व्यञ्जकः शब्दः**

तद्युक्तो व्यञ्जनयुक्तः।

शब्दस्य व्यञ्जकत्वे अर्थस्य सहकारित्वम्

**यत् सोऽर्थान्तरयुक् तथा।**
**अर्थोऽपि व्यञ्जकस्तत्र सहकारितया मतः ॥१५॥**

तथेति व्यञ्जकः।

इति काव्यप्रकाशे शब्दार्थस्वरूपनिर्णयो नाम द्वितीय उल्लासः।

# तृतीय उल्लासः

## आर्थी व्यञ्जना

अर्थाः प्रोक्ताः पुरा तेषाम्

अर्था वाच्यलक्ष्यव्यङ्ग्याः । तेषां वाचकलाक्षणिकव्यञ्जकानाम् ।
अर्थव्यञ्जकतोच्यते ।

कीदृशीत्याह—

वक्तृबोद्धव्यकाकूनां वाक्यवाच्यान्यसंनिधेः ॥१॥
प्रस्तावदेशकालादेर्वैशिष्ट्यात् प्रतिभाजुषाम् ।
योऽर्थस्यान्यार्थधीहेतुर्व्यापारो व्यक्तिरेव सा ॥२॥

बोद्धव्यः प्रतिपाद्यः । काकुर्ध्वनेर्विकारः । प्रस्तावः प्रकरणम् । अर्थस्य वाच्यलक्ष्यव्यङ्ग्यात्मनः । क्रमेणोदाहरणानि—

अइपिहुलं जलकुंभं घेत्तण समागदाह्मि सहि तुरिअम् ।
समसेअसलिलणीसासणीसहा वीसमामि खणम् ॥ १ ॥
[ अतिपृथुलं जलकुम्भं गृहीत्वा समागतास्मि सखि त्वरितम् ।
श्रमस्वेदसलिलनिःश्वासनिःसहा विश्राम्यामि क्षणम् ]
अत्र चौर्यरतगोपनं गम्यते ।

ओण्णिद्दं दोब्बल्लं चिंता अलसत्तणं सणीससिअम् ।
मह मंदभाइणीए केरं सहि तुह वि अहह परिहवइ ॥ २ ॥
[ औन्निद्र्यं दौर्बल्यं चिन्तालसत्वं सनिःश्वसितम् ।
मम मन्दभागिन्याः कृते सखि त्वामप्यहह परिभवति ॥ ]
अत्र दूत्यास्तत्कामुकोपभोगो व्यज्यते ।

तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां
वने व्याधैः सार्धं सुचिरमुषितं वल्कलधरैः ।
विराटस्यावासे स्थितमनुचितारम्भनिभृतं
गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु ॥ ३ ॥

अत्र मयि न योग्यः खेदः कुरुषु तु योग्य इति काक्वा प्रकाश्यते। न च वाच्यसिद्ध्यङ्गमत्र काकुरिति गुणीभूतव्यङ्ग्यत्वं शङ्क्यम्। प्रश्नमात्रेणापि काकोर्विश्रान्तेः।

तइआ मह गंडत्थलणिमिअं दिट्ठिं ण णेसि अण्णत्तो।
एह्हिं सच्चेअ अहं ते अ कवोला ण सा दिट्ठी॥ ४॥

[तदा मम गण्डस्थलनिमग्नां दृष्टिं न नयस्यन्यत्र।
इदानीं सैवाहं तौ च कपोलौ न सा दृष्टिः॥]

अत्र मत्सखीं कपोलप्रतिबिम्बितां पश्यतस्ते दृष्टिरन्यैवाभूत्, चलितायां तु तस्यामन्यैव जाता इत्यहो प्रच्छन्नकामुकत्वं ते इति व्यज्यते।

उद्देशोऽयं सरसकदलीश्रेणिशोभातिशायी
कुञ्जोत्कर्षाङ्कुरितरमणीविभ्रमो नर्मदायाः।
किं चैतास्मिन् सुरतसुहृदस्तान्वि ते वान्ति वाता
येषामग्रे सरति कलिताकाण्डकोपो मनोभूः॥ ५॥

अत्र रतार्थं प्रविशेति व्यङ्ग्यम्।

णोल्लेइ अणोल्लमणा अत्ता मं घरभरम्मि सअलम्मि।
खणमेत्तं जइ संझाइ होई ण व होई वीसामो॥ ६॥

[नुदत्यनार्द्रमनाः श्वश्रूर्मां गृहभरे सकले।
क्षणमात्रं यदि संध्यायां भवति न वा भवति विश्रामः॥]

अत्र संध्या संकेतकाल इति तटस्थं प्रति कयाचिद् द्योत्यते।

सुव्वइ समागमिस्सदि तुज्झ पिओ अज्ज पहरमेत्तेण।
एमेअ क्त्ति चिट्ठसि ता सहि सज्जेसु करणिज्जम्॥ ७॥

[श्रूयते समागमिष्यति तव प्रियोऽद्य प्रहरमात्रेण।
एवमेव किमिति तिष्ठसि तत् सखि सज्जय करणीयम्॥]

अत्रोपपतिं प्रत्यभिसर्तुं प्रस्तुता न युक्तमिति कयाचिन्निवार्यते।

अन्यत्र यूयं कुसुमावचायं कुरुध्वमत्रास्मि करोमि सख्यः।
नाहं हि दूरं भ्रमितुं समर्था प्रसीदतायं रचितोऽञ्जलिर्वः॥८॥

अत्र विविक्तोऽयं देश इति प्रच्छन्नकामुकस्त्वया अभिसार्यता-मित्याश्वस्तां प्रति कयाचिन्निवेद्यते ।

गुरुअणपरवस पिअ किं भणामि तुह मंदभाइणी अहकम् ।
अज्ज पवासं वच्चसि वच्च सअं जेव्व सुणसि करणिज्जम् ॥९॥

[ गुरुजनपरवश प्रिय किं भणामि तव मन्दभागिन्यहकम् ।
अद्य प्रवासं व्रजसि, व्रज, स्वयमेव शृणोसि करणीयम् ॥ ]

अत्राद्य मधुसमये यदि व्रजसि, तदाहं तावन्न भवामि, तव तु न जानामि गतिमिति व्यज्यते । आदिग्रहणाच्चेष्टादेः । तत्र चेष्टया यथा—

द्वारोपान्तनिरन्तरे मयि तया सौन्दर्यसारश्रिया
प्रोल्लास्योरुयुगं परस्परसमासक्तं समासादितम् ।
आनीतं पुरतः शिरोंऽशुकमधः क्षिप्ते चले लोचने
वाचस्तत्र निवारितं प्रसरणं संकोचिते दोर्लते ॥ १० ॥

अत्र चेष्टया प्रच्छन्नकान्तविषय आकूतविशेषो ध्वन्यते ।

निराकाङ्क्षप्रतिपत्तये प्राप्तावसरतया च पुनः पुनरुदाह्रियते । वक्त्रादीनां मिथः संयोगे द्विकादिभेदेन । अनेन क्रमेण लक्ष्य-व्यङ्ग्ययोश्च व्यञ्जकत्वमुदाहार्यम् ।

अर्थस्य व्यञ्जकत्वे शब्दस्य सहकारित्वम्

शब्दप्रमाणवेद्योऽर्थो व्यनक्त्यर्थान्तरं यतः ।
अर्थस्य व्यञ्जकत्वे तच्छब्दस्य सहकारिता ॥३॥

शब्देति । न हि प्रमाणान्तरवेद्योऽर्थो व्यञ्जकः ।

इति काव्यप्रकाशेऽर्थव्यञ्जकतानिर्णयो नाम तृतीयोल्लासः ।

—०—

# दशम उल्लासः

अथालंकारानाह—

## (१) उपमा

**साधर्म्यमुपमा भेदे**

उपमानोपमेययोरेव, न कार्यकारणादिकयोः, साधर्म्यं भवतीति तयोरेव समानेन धर्मेण संबन्ध उपमा। भेदग्रहणमनन्वयव्यवच्छेदाय।

**पूर्णा लुप्ता च**

उपमानोपमेयसाधारणधर्मोपमाप्रतिपादकानामुपादाने पूर्णा। एकस्य द्वयोस्त्रयाणां वा लोपे लुप्ता।

**साग्रिमा।**
**श्रौत्यार्थी च भवेद् वाक्ये समासे तद्धिते तथा ॥१॥**

अग्रिमा पूर्णा

यथेववादिशब्दा यत्परास्तस्यैवोपमानताप्रतीतिरिति यद्यप्युपमानविशेषणान्येते, तथापि शब्दशक्तिमहिम्ना श्रुत्यैव षष्ठीवत् संबन्धं प्रतिपादयन्तीति तत्सद्भावे श्रौती उपमा। तथैव "तत्र तस्येव" इत्यनेनेवार्थे विहितस्य वतेरुपादाने।

'तेन तुल्यं मुखम्'- इत्यादावुपमेये एव, 'तत्तुल्यमस्य'— इत्यादौ चोपमाने एव 'इदं च तच्च तुल्यम्' इत्युभयत्रापि तुल्यादिशब्दानां विश्रान्तिरिति साम्यपर्यालोचनया तुल्यताप्रतीतिरिति साधर्म्यस्यार्थत्वात् तुल्यादिपदोपादाने आर्थी। तद्वत् "तेन तुल्यं क्रिया चेद् वतिः" इत्यनेन विहितस्य वतेः स्थितौ।

'इवेन नित्यसमासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च' इति नित्यसमासे इवशब्दयोगे समासगा।

क्रमेणोदाहरणम् ।

स्वप्नेऽपि समरेषु त्वां विजयश्रीर्न मुञ्चति ।
प्रभावप्रभवं कान्तं स्वाधीनपतिका यथा ॥१॥

चकितहरिणलोललोचनायाः क्रुधि तरुणारुणहारिकान्ति ।
सरसिजमिदमाननं च तस्याः सममिति चेतसि संमदं विधत्ते ॥२॥

अत्यायतैर्नियमकारिभिरुद्धतानां
दिव्यैः प्रभाभिरनपायमयैरुपायैः ।
शौरिभुजैरिव चतुर्भिरदः सदा यो
लक्ष्मीविलासभवनैर्भुवनं बभार ॥३॥

अवितथमनोरथपथप्रथनेषु प्रगुणगरिमगीतश्रीः ।
सुरतरुसदृशः स भवानभिलषणीयः क्षितीश्वर न कस्य ॥४॥

गाम्भीर्यगरिमा तस्य सत्यं गङ्गाभुजंगवत् ।
दुरालोकः स समरे निदाघाम्बररत्नवत् ॥ ५ ॥

स्वाधीनपतिका कान्तं भजमाना यथा लोकोत्तरचमत्कारभूः— तथा जयश्रीस्त्वदासेवनेन-इत्यादिना प्रतीयमानेन विना यद्यपि नोक्तेर्वैचित्र्यम्, वैचित्र्यं चालंकारः, तथापि न ध्वनिगुणीभूतव्यङ्ग्यव्यवहारः, न खलु व्यङ्ग्यसंस्पर्शपरामर्शादत्र चारुताप्रतीतिः, अपि तु वाच्यवैचित्र्यप्रतिभासादेव । रसादिस्तु व्यङ्ग्योऽर्थोऽलंकारान्तरं च सर्वत्राव्यभिचारीत्यगणयित्वैव तदलंकारा उदाहृताः । तद्रहितत्वेन तु उदाह्रियमाणा विरसतामावहन्तीति पूर्वापरविरुद्धाभिधानमिति न चोदनीयम् ।

तद्वत् धर्मस्य लोपे स्यान्न श्रौती तद्धिते पुनः ।

धर्मः साधारणः । तद्धिते कल्पबादौ त्वार्थ्येव तेन पञ्च ।

उदाहरणम्—

धन्यस्यानन्यसामान्यसौजन्योत्कर्षशालिनः ।
करणीयं वचश्चेतः सत्यं तस्यामृतं यथा ॥ ६ ॥

आकृष्टकरवालोऽसौ संपराये परिभ्रमन् ।
प्रत्यर्थिसेनया दृष्टः कृतान्तेन समः प्रभुः ॥ ७ ॥

करवाल इवाचारस्तस्य वागमृतोपमा ।
विषकल्पं मनो वेत्सि यदि जीवसि तत् सखे ॥ ८ ॥

उपमानानुपादाने वाक्यगाथ समासगा ॥ २ ॥

सअलकरणपरवीसामसिरिविअरणं ण सरसकव्वस्स ।
दीसइ अहव णिसम्मइ सरिसं अंसंसमेत्तेण ॥ ९ ॥

[ सकलकरणपरविश्रामश्रीवितरणं न सरसकाव्यस्य ।
दृश्यतेऽथवा निशम्यते सदृशमंशांशमात्रेण । ]

कव्वस्सेत्यत्र कव्वसममिति, सरिसमित्यत्र च णूणमिति पाठे एषैव समासगा ।

वादेर्लोपे समासे सा कर्माधारक्यचि क्यङि ।

कर्मकर्त्रोर्णमुलि

वाशब्दः उपमाद्योतकः इति वादेरुपमाप्रतिपादकस्य लोपे षट्समासेन, कर्मणोऽधिकरणाच्चोत्पन्नेन क्यचा, कर्तुः क्यङा, कर्मकर्त्रोरुपपदयोर्णमुला च भवेत् ।

उदाहरणम्—

ततः कुमुदनाथेन कामिनीगण्डपाण्डुना ।
नेत्रानन्देन चन्द्रेण माहेन्द्री दिगलंकृता ॥१०॥

तथा

असितभुजगभीषणासिपत्रो रुहरुहिकाहितचित्ततूर्णचारः ।
पुलकिततनुरुत्कपोलकान्तिः प्रतिभटविक्रमदर्शनेऽयमासीत् ॥११॥

पौरं सुतीयति जनं समरान्तरेऽसा-
वन्तःपुरीयति विचित्रचरित्रचुञ्चुः

नारीयते समरसीम्नि कृपाणपाणे-
रालोक्य तस्य चरितानि सपत्नसेना ॥१२॥

मृधे निदाघघर्मांशुदर्शं पश्यन्ति तं परे ।
स पुनः पार्थसंचारं संचरत्यवनीपतिः ॥१३॥

एतद्द्विलोपे क्विप्समासगा ॥३॥

एतयोर्धर्मवाद्योः । उदाहरणम्—

सविता विधवति विधुरपि सवितरति तथा दिनन्ति यामिन्यः ।
यामिनयन्ति दिनानि च सुखदुःखवशीकृते मनसि ॥१४॥

परिपन्थिमनोराज्यशतैरपि दुराक्रमः ।
संपरायप्रवृत्तोऽसौ राजते राजकुञ्जरः ॥ १५ ॥

धर्मोपमानयोर्लोपे वृत्तौ वाक्ये च दृश्यते ।

ढुण्ढुणन्तो मरिहसि कण्टअकलिआइँ केअइवणाइं ।
मालइकुसुमसरिच्छं भमर भमन्तो ण पाविहिसि ॥ १६ ॥

[ ढुण्ढुणायमानो मरिष्यसि कण्टककलितानि केतकीवनानि ।
मालतीकुसुमसदृक्षं भ्रमर भ्रमन्नपि न प्राप्स्यसि ॥ ]

कुसुमेण सममिति पाठे वाक्यगा ।

क्वचि द्वाद्युपमेयासे

आसे निरासे ।

अरातिविक्रमालोकविकस्वरविलोचनः ।
कृपाणोदग्रदोर्दण्डः स सहस्रायुधीयति ॥ १७ ॥

अत्रात्मा उपमेयः ।

त्रिलोपे च समासगा ॥ ४ ॥

९५९६४

त्रयाणां वादिधर्मोपमानानाम्। उदाहरणम्—

तरुणिमनि कृतावलोकना ललितविलासवितीर्णविग्रहा।
स्मरशरविसराचितान्तरा मृगनयना हरते मुनेर्मनः ॥ १८ ॥

अत्र सप्तम्युपमानेत्यादिना यदा समासलोपौ भवतः

तदेदमुदाहरणम्।

क्रूरस्य आचारस्य अयःशूलतया अध्यवसायात्, 'अयःशूलेनान्विच्छति आयःशूलिकः' इत्यतिशयोक्तिः न तु क्रूराचारोपमेय-तैक्ष्ण्यधर्मवादीनां लोपे त्रिलोपेयमुपमा।

एवमेकोनविंशतिर्लुप्ताः। पूर्णाभिः सह पञ्चविंशतिः।

अनयेनेव राज्यश्रीर्दैन्येनेव मनस्विता।
मम्लौ साथ विषादेन पद्मिनीव हिमाम्भसा ॥ १९ ॥

इह अभिन्ने साधारणे धर्मे—

ज्योत्स्नेव नयनानन्दः सुरेव मदकारणम्।
प्रभुतेव समाकृष्टसर्वलोका नितम्बिनी ॥ २० ॥

इह भिन्ने च तस्मिन्—

एकस्यैव बहूपमानोपादाने मालोपमा।

यथोत्तरमुपमेयस्योपमानत्वे पूर्ववदभिन्नभिन्नधर्मत्वे—

अनवरतकनकवितरणजललवभृतकरतरङ्गितार्थिततेः।
भणितिरिव मतिर्मतिरिव चेष्टा चेष्टेव कीर्तिरतिविमला ॥ २१ ॥

मतिरिव मूर्तिर्मधुरा मूर्तिरिव सभा प्रभावचिता।
तस्य सभेव जयश्रीः शक्या जेतुं नृपस्य न परेषाम् ॥ २२ ॥

इत्यादिका रशनोपमा च—

न लक्षिता। एवंविधवैचित्र्यसहस्रसंभवात्। उक्तभेदानतिक्रमाच्च।

## (२) अनन्वयः

उपमानोपमेयत्वे एकस्यैवैकवाक्यगे ।

अनन्वयः

उपमानान्तरसंबन्धाभावोऽनन्वयः ।

उदाहरणम्—

न केवलं भाति नितान्तकान्तिर्नितम्बिनी सैव नितम्बिनीव ।
यावद् विलासायुधलास्यवासास्ते तद्विलासा इव तद्विलासाः ॥२३॥

## (३) उपमेयोपमा

विपर्यास उपमेयोपमा तयोः ॥५॥

तयोः उपमानोपमेययोः, परिवृत्तिः अर्थात् वाक्यद्वये, इतरोपमानव्यवच्छेदपरा उपमेयेनोपमा इति उपमेयोपमा ।

उदाहरणम्—

कमलेव मतिर्मतिरिव कमला तनुरिव विभा विभेव तनुः ।
धरणीव धृतिर्धृतिरिव धरणी सततं विभाति बत यस्य ॥२४॥

## (४) उत्प्रेक्षा

संभावनमथोत्प्रेक्षा प्रकृतस्य समेन यत् ।

समेन उपमानेन ।

उदाहरणम्—

उन्मेषं यो मम न सहते जातिवैरी निशाया-
मिन्दोरिन्दीवरदलदृशा तस्य सौन्दर्यदर्पः ।
नीतः शान्तिं प्रसभमनया वक्त्रकान्त्येति हर्षा-
ल्लग्ना मन्ये ललिततनु ते पादयोः पद्मलक्ष्मीः ॥ २५ ॥

लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ।
असत्पुरुषसेवेव दृष्टिर्विफलतां गता ॥ २६ ॥

इत्यादौ व्यापनादि लेपनादिरूपतया संभावितम् ।

(५) ससंदेहः

ससंदेहस्तु भेदोक्तौ तदनुक्तौ च संशयः॥ ६ ॥

भेदोक्तौ यथा—

अयं मार्तण्डः किं स खलु तुरगैः सप्तभिरितः
कृशानुः किं सर्वाः प्रसरति दिशो नैष नियतम् ।
कृतान्तः किं साक्षान्महिषवहनोऽसाविति चिरं
समालोक्याजौ त्वां विदधति विकल्पान् प्रतिभटाः ॥२७॥

भेदोक्तावित्यनेन न केवलमयं निश्चयगर्भो, यावनिश्चयान्तोऽपि संदेहः स्वीकृतः । यथा—

इन्दुः किं क कलङ्कः सरसिजमेतत् किमम्बु कुत्र गतम् ।
ललितसविलासवचनैर्मुखमिति हरिणाक्षि निश्चितं परतः ॥२८॥

किंतु निश्चयगर्भ इव नात्र निश्चयः प्रतीयमान इति उपेक्षितो भट्टोद्भटेन । तदनुक्तौ यथा—

अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः
शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः ।
वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो
निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः ॥ २९ ॥

(६) रूपकम्

तद् रूपकमभेदो य उपमानोपमेययोः ।

अतिसाम्यात् अनपह्नुतभेदयोः अभेदः ।

समस्तवस्तुविषयं श्रौता आरोपिता यदा ॥ ७ ॥

आरोपविषया इव आरोप्यमाणाः यदा शब्दोपात्ताः तदा समस्तानि वस्तूनि विषयोऽस्येति समस्तवस्तुविषयम् । आरोपिता इति बहुवचनमविवक्षितम् ।

यथा—

जोत्स्नाभस्मच्छुरणधवला बिभ्रती तारकास्थी-
न्यन्तर्धानव्यसनरसिका रात्रिकापालिकीयम् ।
द्वीपाद् द्वीपं भ्रमति दधती चन्द्रमुद्राकपाले
न्यस्तं सिद्धाञ्जनपरिमलं लाञ्छनस्य च्छलेन ॥ ३० ॥

अत्र अन्तर्धानव्यसनरसिकत्वमारोपितधर्म एवेति पादत्रये रूपकपरिग्रहे साधक साधकमस्तीति तत्संकराशङ्का न कार्या ।

श्रौता आर्थाश्च ते यस्मिन्नेकदेशविवर्ति तत् ।

केचिदारोप्यमाणाः शब्दोपात्ताः केचिदर्थसामर्थ्यादवसेयाः- इत्येकदेशविवर्तनात् एकदेशविवर्ति । यथा —

जस्स रणन्तेउरए करे कुणन्तस्स मण्डलग्गलअम् ।
रससंमुही वि सहसा परंमुही होइ रिउसेणा ॥३१॥

[ यस्य रणान्तःपुरे करे कुर्वतो मण्डलाग्रलताम् ।
रससंमुख्यपि सहसा पराङ्मुखी भवति रिपुसेना ॥ ]

अत्र रणस्यान्तःपुरत्वमारोप्यमाणं शब्दोपात्तम्, मण्डलाग्रलतायाः नायिकात्वम्, रिपुसेनायाश्च प्रतिनायिकात्वम्, अर्थसामर्थ्यादवसीयते इति, एकदेशे विशेषेण वर्तनादेकदेशविवर्ति ।

साङ्गमेतत्

उक्तद्विभेदं सावयवम् ।

निरङ्गं तु शुद्धम्

यथा—

2030 मो० वि० 2013107

कुरङ्गीवाङ्गानि स्तिमितयति गीतध्वनिषु यत्
सखीं कान्तोदन्तं श्रुतमपि पुनः प्रश्नयति यत् ।
अनिद्रं यच्चान्तः स्वपिति तदहो वेद्म्यभिनवां
प्रवृत्तोऽस्याः सेक्तुं हृदि मनसिजः प्रेमलतिकाम् ॥३२॥

माला तु पूर्ववत् ॥८॥

मालोपमायामिवैकस्मिन् बहव आरोपिताः ।

यथा—

सौन्दर्यस्य तरङ्गिणी तरुणिमोत्कर्षस्य हर्षोद्गमः
कान्तेः कार्मणकर्म नर्मरहसामुल्लासनावासभूः ।
विद्या वक्रगिरां विधेरनवधिप्रावीण्यसाक्षात्क्रिया
बाणाः पञ्चशिलीमुखस्य ललनाचूडामणिः सा प्रिया ॥३३॥

नियतारोपणोपायः स्यादारोपः परस्य यः ।
तत् परंपरितं श्लिष्टे वाचके भेदभाजि वा ॥ ९ ॥

यथा--

विद्वन्मानसहंस वैरिकमलासंकोचदीप्तद्युते
दुर्गामार्गणनीललोहित समित्स्वीकारवैश्वानर ।
सत्यप्रीतिविधानदक्ष विजयप्राग्भावभीम प्रभो
साम्राज्यं वरवीर वत्सरशतं वैरिञ्चमुच्चैः क्रियाः ॥३४॥

अत्र, मानसमेव मानसम्, कमलायाः संकोच एव कमलानामसंकोचः, दुर्गाणाममार्गणमेव दुर्गायाः मार्गणम्, समितां स्वीकार एव समिधां स्वीकारः, सत्ये प्रीतिरेव सत्यामप्रीतिः, विजयः परपराभव एव विजयोऽर्जुनः,-एवमारोपणनिमित्तो हंसादेरारोपः ।

यद्यपि शब्दार्थालंकारोऽयमित्युक्तम्, वक्ष्यते च, तथापि प्रसिद्ध्यनुरोधादत्रोक्तः । एकदेशविवर्ति हीदमन्यैरभिधीयते ।

भेदभाजि यथा--

आलानं जयकुञ्जरस्य दृषदां सेतुर्विपद्वारिधेः
पूर्वाद्रिः करवालचण्डमहसो लीलोपधानं श्रियः ।
सङ्ग्रामामृतसागरप्रमथनक्रीडाविधौ मन्दरो
राजन् राजति वीरवैरिवनितावैधव्यदस्ते भुजः ॥३५॥

अत्र जयादेर्भिन्नशब्दवाच्यस्य कुञ्जरत्वाद्यारोपे भुजस्य आलानत्वाद्यारोपो युज्यते ।

अलौकिकमहालोकप्रकाशितजगत्त्रयः ।
स्तूयते देव सद्वंशमुक्तारत्नं न कैर्भवान् ॥३६॥

निरवधि च निराश्रयं च यस्य स्थितमनिवर्तितकौतुकप्रपञ्चम् ।
प्रथम इह भवान् स कूर्ममूर्तिर्जयति चतुर्दशलोकवल्लिकन्दः ॥३७॥

इति च अमालारूपकमपि परंपरितं द्रष्टव्यम् ।

किसलयकरैर्लतानां करकमलैः कामिनां मनो जयति ।
नलिनीनां कमलमुखैर्मुखेन्दुभिर्योषितां मदनः ॥ ३८ ॥

इत्यादि रशनारूपकं न वैचित्र्यवदिति न लक्षितम् ।

## ( ७ ) अपह्नुतिः

प्रकृतं यन्निषिध्यान्यत् साध्यते सा त्वपह्नुतिः ।

उपमेयम् असत्यं कृत्वोपमानं सत्यतया यत् स्थाप्यते सा तु अपह्नुतिः ।

उदाहरणम्--

अवाप्तः प्रागल्भ्यं परिणतरुचः शैलतनये
कलङ्को नैवायं विलसति शशाङ्कस्य वपुषि ।
अमुष्येयं मन्ये विगलदमृतस्यन्दशिशिरे
रतिश्रान्ता शेते रजनिरमणी गाढमुरसि ॥ ३९ ॥

इत्थं वा—

बत सखि कियदेतत् पश्य वैरं स्मरस्य
प्रियविरहकृशेऽस्मिन् रागिलोके तथा हि ।
उपवनसहकारोद्भासिभृङ्गच्छलेन
प्रतिविशिखमनेनोट्टङ्कितं कालकूटम् ॥ ४० ॥

अत्र हि न सभृङ्गाणि सहकाराणि, अपि तु सकालकूटाः शराः, इति प्रतीतिः । एवं वा—

अमुष्मिँल्लावण्यामृतसरसि नूनं मृगदृशः
स्मरः शर्वप्लुष्टः पृथुजघनभागे निपतितः ।
यदङ्गाङ्गाराणां प्रशमपिशुना नाभिकुहरे
शिखा धूमस्येयं परिणमति रोमावलिवपुः ॥ ४१ ॥

अत्र न रोमावलिः, धूमशिखेयमिति प्रतिपत्तिः । एवमियं भङ्ग्यन्तरैरप्यूह्या ।

## (८) श्लेषः

**श्लेषः स वाक्ये एकस्मिन् यत्रानेकार्थता भवेत् ॥१०॥**

एकार्थप्रतिपादकानामेव शब्दानां यत्रानेकोऽर्थः स श्लेषः ।

उदाहरणम्—

उदयमयते दिङ्मालिन्यं निराकुरुतेतराम्
नयति निधनं निद्रामुद्रां प्रवर्तयति क्रियाः ।
रचयतितरां स्वैराचारप्रवर्तनकर्तनम्
बत बत लसत्तेजःपुञ्जो विभाति विभाकरः ॥ ४२ ॥

अत्राभिधाया अनियन्त्रणात् द्वावप्यर्कभूपौ वाच्यौ ।

## (९) समासोक्तिः

**परोक्तिर्भेदकैः श्लिष्टैः समासोक्तिः**

प्रकृतार्थप्रतिपादकवाक्येन श्लिष्टविशेषणमाहात्म्यात्, न तु विशेष्यस्य सामर्थ्यादपि, यत् अप्रकृतस्याभिधानम्, सा समासेन संक्षेपेणार्थद्वयकथनात् समासोक्तिः। उदाहरणम्—

लहिऊण तुज्झ बाहुप्फंसं जीए स को वि उल्लासो।
जअलच्छी तुह विरहे ण हुज्जला दुब्बला णं सा ॥ ४३ ॥

[ लब्ध्वा तव बाहुस्पर्शं यस्याः स कोऽप्युल्लासः।
जयलक्ष्मीस्तव विरहे न खलूज्ज्वला दुर्बला ननु सा ॥ ]

अत्र जयलक्ष्मीशब्दस्य केवलं कान्तावाचकत्वं नास्ति।

## (१०) निदर्शना

निदर्शना ॥
अभवन् वस्तुसंबन्ध उपमापरिकल्पकः ॥११॥

निदर्शनं दृष्टान्तकरणम्।

उदाहरणम्—

क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥ ४४ ॥

अत्र, उडुपेन सागरतरणमिव मन्मत्या सूर्यवंशवर्णनमित्युपमायां पर्यवस्यति। यथा वा—

उदयति विततोर्ध्वरश्मिरज्जावहिमरुचौ हिमधाम्नि याति चास्तम्।
वहति गिरिरयं विलम्बिघण्टाद्वयपरिवारितवारणेन्द्रलीलाम् ॥४५॥

अत्र, कथमन्यस्य लीलामन्यो वहतीति तत्सदृशीमित्युपमायां पर्यवसानम्।

दोर्भ्यां तितीर्षति तरङ्गवतीभुजंग—
मादातुमिच्छति करे हरिणाङ्कबिम्बम्।
मेरुं लिलङ्घयिषति ध्रुवमेष देव
यस्ते गुणान् गदितुमुद्यममादधाति ॥ ४६ ॥

इत्यादौ मालारूपाप्येषा द्रष्टव्या ।

स्वस्वहेत्वन्वयस्योक्तिः क्रिययैव च सापरा ।

क्रिययैव स्वस्वरूप-स्वकारणयोः संबन्धो यदवगम्यते सा, अपरा निदर्शना । यथा—

उन्नतं पदमवाप्य यो लघुर्हेलयैव स पतेदिति ब्रुवन् ।
शैलशेखरगतो दृषत्कणश्चारुमारुतधुतः पतत्यधः ॥ ४७ ॥

अत्र पातक्रियया पतनस्य, लाघवे सति उन्नतपदप्राप्तिरूपस्य च, संबन्धः ख्याप्यते ।

## ( ११ ) अप्रस्तुतप्रशंसा

अप्रस्तुतप्रशंसा या सा सैव प्रस्तुताश्रया ॥ १२ ॥

अप्राकरणिकस्याभिधानेन प्राकरणिकस्याक्षेपोऽप्रस्तुतप्रशंसा ।

कार्ये निमित्ते सामान्ये विशेषे प्रस्तुते सति ।
तदन्यस्य वचस्तुल्ये तुल्यस्येति च पञ्चधा ॥ १३ ॥

तदन्यस्य कारणादेः ।

क्रमेणोदाहरणम्—

याताः किं न मिलन्ति सुन्दरि पुनश्चिन्ता त्वया मत्कृते
नो कार्या नितरां कृशासि कथयत्येवं सबाष्पे मयि ।
लज्जामन्थरतारकेण निपतत्पीताश्रुणा चक्षुषा
दृष्ट्वा मां हसितेन भाविमरणोत्साहस्तया सूचितः ॥ ४८ ॥

अत्र प्रस्थानात् किमिति निवृत्तोऽसि कार्ये पृष्टे कारणमभिहितम्

राजन् राजसुता न पाठयति मां देव्योऽपि तूष्णीं स्थिताः
कुब्जे भोजय मां कुमारसचिवैर्नाद्यापि किं भुज्यते ।
इत्थं नाथ शुकस्तवारिभवने मुक्तोऽध्वगैः पञ्जरात्
चित्रस्थानवलोक्य शून्यवलभावेकैकमाभाषते ॥ ४९ ॥

अत्र प्रस्थानोद्यतं भवन्तं ज्ञात्वा सहसैव त्वदरयः पलाय्य गताः— इति कारणे प्रस्तुते कार्यमुक्तम्।

एतत् तस्य मुखात् कियत् कमलिनीपत्रे कणं वारिणो
यन्मुक्तामणिरित्यमंस्त स जडः शृण्वन्यदस्मादपि।
अङ्गुल्यग्रलघुक्रियाप्रविलयिन्यादीयमाने शनैः
कुत्रोड्डीय गतो ममेत्यनुदिनं निद्राति नान्तःशुचा ॥५०॥

अत्र अस्थाने जडानां ममत्वसंभावना भवतीति सामान्ये प्रस्तुते विशेषः कथितः।

सुहृद्वधूबाष्पजलप्रमार्जनं
करोति वैरप्रतियातनेन यः।
स एव पूज्यः स पुमान् स नीतिमान्
सुजीवितं तस्य स भाजनं श्रियः ॥५१॥

अत्र 'कृष्णं निहत्य नरकासुरवधूनां यदि दुःखं प्रशमयासि, तत् त्वमेव श्लाघ्यः' – इति विशेषे प्रकृते सामान्यमभिहितम्।

तुल्ये प्रस्तुते तुल्याभिधाने त्रयः प्रकाराः– श्लेषः, समासोक्तिः, सादृश्यमात्रं वा, तुल्यात् तुल्यस्य ह्याक्षेपे हेतुः। क्रमेणोदाहरणम्—

पुंस्त्वादपि प्रविचलेद् यदि यद्यधोऽपि
यायाद् यदि प्रणयने न महानपि स्यात्।
अभ्युद्धरेत् तदपि विश्वमितीदृशीयं
केनापि दिक् प्रकटिता पुरुषोत्तमेन ॥५२॥

येनास्यभ्युदितेन चन्द्र गमितः क्लान्तिं रवौ तत्र ते
युज्येत प्रतिकर्तुमेव न पुनस्तस्यैव पादग्रहः।
क्षीणेनैतदनुष्ठितं यदि ततः किं लज्जसे नो मनाग्
अस्त्वेवं जडधामता तु भवतो यद् व्योम्नि विस्फूर्जसे ॥५३॥

आदाय वारि परितः सरितां मुखेभ्यः
किं तावदर्जितमनेन दुरर्णवेन।

क्षारीकृतं च वडवादहने हुतं च
पातालकुक्षिकुहरे विनिवेशितं च ॥५४॥

इयं च क्वचिद् वाच्ये प्रतीयमानार्थानध्यारोपेणापि भवति । यथा–

अब्धेरम्भः स्थगितभुवनाभोगपातालकुक्षेः
पोतोपाया इह हि बहवो लङ्घनेऽपि क्षमन्ते ।
आहो रिक्तः कथमपि भवेदेष दैवात् तदानीं
को नाम स्यादवटकुहरालोकनेऽप्यस्य कल्पः ॥५५॥

क्वचिदध्यारोपेणैव । यथा—

कस्त्वं भोः कथयामि दैवहतकं मां विद्धि शाखोटकं
वैराग्यादिव वक्षि साधु विदितं कस्मादिदं कथ्यते ।
वामेनात्र वटस्तमध्वगजनः सर्वात्मना सेवते
न च्छायापि परोपकारकरणे मार्गस्थितस्यापि मे ॥५६॥

क्वचिदंशेष्वध्यारोपेण । यथा—

सोऽपूर्वो रसनाविपर्ययविधिस्तत् कर्णयोश्चापलं
दृष्टिः सा मदविस्मृतस्वपरदिक् किं भूयसोक्तेन वा ।
सर्वं विस्मृतवानसि भ्रमर हे यद् वारणोऽद्याप्यसा-
वन्तःशून्यकरो निषेव्यत इति भ्रातः क एष ग्रहः ॥५७॥

अत्र रसनाविपर्यासः शून्यकरत्वं च भ्रमरस्य असेवने न हेतुः,
कर्णचापलं तु हेतुः, मदः प्रत्युत सेवने निमित्तम् ।

## (१२) अतिशयोक्तिः

निगीर्याध्यवसानं तु प्रकृतस्य परेण यत् ।
प्रस्तुतस्य यदन्यत्वं यद्यर्थोक्तौ च कल्पनम् ॥ १४ ॥

कार्यकारणयोर्यश्च पौर्वापर्यविपर्ययः ।
विज्ञेयातिशयोक्तिः सा

उपमानेनान्तर्निगीर्णस्योपमेयस्य यदध्यवसानं सैका । यथा-

कमलमनम्भसि कमले च कुवलये तानि कनकलतिकायाम् ।
सा च सुकुमारसुभगेत्युत्पातपरम्परा केयम् ॥ ५८ ॥

अत्र मुखादि कमलादिरूपतयाध्यवसितम् ।

यच्च तदेवान्यत्वेनाध्यवसीयते, सा अपरा । यथा-

अण्णं लडहत्तणअं अण्णा विअ का वि वत्तणच्छाआ ।
सामा सामण्णपआवइणो रेह च्चिअ ण होई ॥ ५९ ॥

[ अन्यत् सौकुमार्यमन्यैव च कापि वर्तनच्छाया ।
श्यामा सामान्यप्रजापतेः रेखैव च न भवति ॥ ]

यद्यर्थस्य यदिशब्देन चेच्छब्देन वा उक्तौ यत् कल्पनम्, अर्थात् असंभविनोऽर्थस्य, सा तृतीया । यथा

राकायामकलङ्कं चेदमृतांशोर्भवेद् वपुः ।
तस्या मुखं तदा साम्यपराभवमवाप्नुयात् ॥ ६० ॥

कारणस्य शीघ्रकारितां वक्तुं कार्यस्य पूर्वमुक्तौ चतुर्थी । यथा-

हृदयमधिष्ठितमादौ मालत्याः कुसुमचापबाणेन ।
चरमं रमणीवल्लभ लोचनविषयं त्वया भजता ॥ ६१ ॥

## ( १३ ) प्रतिवस्तूपमा

प्रतिवस्तूपमा तु सा ॥ १५ ॥
सामान्यस्य द्विरेकस्य यत्र वाक्यद्वये स्थितिः ।

साधारणो धर्मः उपमेयवाक्ये उपमानवाक्ये च, कथितपदस्य दुष्टतयाभिहितत्वात्, शब्दभेदेन यत् उपादीयते, सा वस्तुनो वाक्यार्थस्योपमानत्वात् प्रतिवस्तूपमा । यथा--

देवीभावं गमिता परिवारपदं कथं भजत्वेषा ।
न खलु परिभोगयोग्यं दैवतरूपाङ्कितं रत्नम् ॥६२॥

यदि दहत्यनलोऽत्र किमद्भुतं यदि च गौरवमद्रिषु किं ततः।
लवणमम्बु सदैव महोदधेः प्रकृतिरेव सतामविषादिता ॥६३॥

इत्यादिका मालाप्रतिवस्तूपमा द्रष्टव्या। एवमन्यत्राप्यनुसर्तव्यम्।

## (१४) दृष्टान्तः

दृष्टान्तः पुनरेतेषां सर्वेषां प्रतिबिम्बनम् ॥ १६ ॥

एतेषां साधारणधर्मादीनाम् दृष्टोऽन्तः निश्चयो यत्र स दृष्टान्तः। यथा--

त्वयि दृष्ट एव तस्या निर्वाति मनो मनोभवज्वलितम्।
आलोके हि हिमांशोर्विकसति कुसुमं कुमुद्वत्याः ॥६४॥

एष साधर्म्येण। वैधर्म्येण तु यथा--

तवाहवे साहसकर्मशर्मणः करं कृपाणान्तिकमानिनीषतः।
भटाः परेषां विशरारुतामगुर्दधत्यवाते स्थिरतां हि पांसवः ॥६५॥

## (१५) दीपकम्

सकृद् वृत्तिस्तु धर्मस्य प्रकृताप्रकृतात्मनाम्।
सैव क्रियासु बह्वीषु कारकस्येति दीपकम् ॥ १७ ॥

प्राकरणिकाप्राकरणिकानाम् उपमानोपमेयानाम् धर्मः क्रियादिः, एकवारमेव यत् उपादीयते, तत् एकस्थस्यैव समस्तवाक्यदीपनात् दीपकम्। यथा--

किवणाणँ धणं णाआणँ फणमणी केसराइँ सीहाणं।
कुलवालिआणँ त्थणआ कुत्तो छिप्पन्ति अमुआणम् ॥ ६६॥

[ कृपणानां धनं नागानां फणमणिः केसराः सिंहानाम्।
कुलबालिकानां स्तनाः कुतः स्पृश्यन्तेऽमृतानाम् ॥ ]

कारकस्य च बह्वीषु क्रियासु सकृद् वृत्तिर्दीपकम्। यथा—

स्विद्यति कूणति वेल्लति विचलति निमिषति विलोकयति तिर्यक्।
अन्तर्नन्दति चुम्बितुमिच्छति नवपरिणया वधूः शयने ॥ ६७ ॥

## (१६) मालादीपकम्

मालादीपकमाद्यं चेद् यथोत्तरगुणावहम्।

पूर्वेण पूर्वेण वस्तुना उत्तरमुत्तरं चेदुपक्रियते, तत् मालादीपकम्। यथा—

संग्रामाङ्गणमागतेन भवता चापे समारोपिते
देवाकर्णय येन येन सहसा यद् यत् समासादितम्।
कोदण्डेन शराः शरैररिशिरस्तेनापि भूमण्डलं
तेन त्वं भवता च कीर्तिरतुला कीर्त्या च लोकत्रयम् ॥ ६८ ॥

## (१७) तुल्ययोगिता

नियतानां सकृद् धर्मः सा पुनस्तुल्ययोगिता ॥१८॥

नियतानां प्राकरणिकानामेव अप्राकरणिकानामेव वा। क्रमेणोदाहरणम्—

पाण्डु क्षामं वदनं हृदयं सरसं तवालसं च वपुः।
आवेदयति नितान्तं क्षेत्रियरोगं सखि हृदन्तः ॥ ६९ ॥

कुमुदकमलनीलनीरजालिर्ललितविलासजुषोर्दृशोः पुरः का।
अमृतममृतरश्मिरम्बुजन्म प्रतिहतमेकपदे तवाननस्य ॥७०॥

## (१८) व्यतिरेकः

उपमानाद् यदन्यस्य व्यतिरेकः स एव सः।

अन्यस्योपमेयस्य, व्यतिरेक आधिक्यम्।

क्षीणः क्षीणोऽपि शशी भूयो भूयोऽभिवर्धते नित्यम्।
विरम प्रसीद सुन्दरि यौवनमनिवर्ति यातं तु ॥ ७१ ॥

इत्याद्यावुपमानस्योपमेयादाधिक्यमिति यत् केनचिदुक्तम् तदयुक्तम् । अत्र यौवनगतास्थैर्याधिक्यं हि विवक्षितम् ।

हेत्वोरुक्तावनुक्तीनां त्रये साम्ये निवेदिते ॥१९॥

शब्दार्थाभ्यामथाक्षिप्ते श्लेषे तद्वत् त्रिरष्ट तत् ।

व्यतिरेकस्य हेतुः उपमेयगतमुत्कर्षनिमित्तम्, उपमानगतमपकर्षकारणम् । तयोर्द्वयोरुक्तिः । एकतरस्य द्वयोर्वा अनुक्तिरित्यनुक्तित्रयम् । एतद्भेदचतुष्टयमुपमानोपमेयभावे शब्देन प्रतिपादिते । आर्थेन च क्रमेणोक्ताश्चत्वार एव भेदाः । आक्षिप्ते चौपम्ये तावन्त एव । एवं द्वादश । एते श्लेषेऽपि भवन्तीति चतुर्विंशतिर्भेदाः ।

क्रमेणोदाहरणम् —

असिमात्रसहायस्य प्रभूतारिपराभवे ।
अन्यतुच्छजनस्येव न स्मयोऽस्य महाधृतेः ॥७२॥

अत्रैव तुच्छेति महाधृतेरित्यनयोः पर्यायेण युगपद्वानुपादानेऽन्यत् भेदत्रयम् । एवमन्येष्वपि द्रष्टव्यम् । अत्र इवशब्दस्य सद्भावाच्छाब्दमौपम्यम् ।

असिमात्रसहायोऽपि प्रभूतारिपराभवे ।
नैवान्यतुच्छजनवत् सगर्वोऽयं महाधृतिः ॥७३॥

अत्र तुल्यार्थे वतिरित्यार्थमौपम्यम् ।

इयं सुनयना दासीकृततामरसश्रिया ।
आननेनाकलङ्केन जयतीन्दुं कलङ्किनम् ॥७४॥

अत्रेवादि-तुल्यादि-पदविरह आक्षिप्तैवोपमा ।

जितेन्द्रियतया सम्यग्विद्यावृद्धनिषेविणः ।
अतिगाढगुणस्यास्य नाब्जवद् भङ्गुरा गुणाः ॥७५॥

अत्रेवार्थे वतिः, गुणशब्दः श्लिष्टः, शाब्दमौपम्यम् ।

अखण्डमण्डलः श्रीमान् पश्यैष पृथिवीपतिः ।
न निशाकरवज्जातु कलावैकल्यमागतः ॥ ७६ ॥

अत्र तुल्यार्थे वतिः, कलाशब्दः श्लिष्टः, आर्थमौपम्यम् ।

मालाप्रतिवस्तूपमावत् मालाव्यतिरेकोऽपि संभवति । तस्यापि भेदा एवमूह्याः । दिङ्मात्रं चोदाह्रियते । यथा—

हरवन्न विषमदृष्टिर्हरिवन्न विभो विधूतविततवृषः ।
रविवन्न चातिदुःसहकरतापितभूः कदाचिदसि ॥ ७७ ॥

अत्र तुल्यार्थे वतिः, विषमादयश्च शब्दाः श्लिष्टाः । आर्थमौपम्यम् ।

नित्योदितप्रतापेन त्रियामामीलितप्रभः ।
भास्वतानेन भूपेन भास्वानेष विनिर्जितः ॥ ७८ ॥

अत्र ह्याक्षिप्तैवोपमा । भास्वतेति श्लिष्टः । यथा वा—

स्वच्छात्मतागुणसमुल्लसितेन्दुबिम्बं
बिम्बप्रभाधरकृत्रिमहृद्यगन्धम् ।
यूनामतीव पिबतां रजनीषु यत्र
तृष्णां जहार मधु नाननमङ्गनानाम् ॥७९॥

अत्रेवादीनां तुल्यादीनां च पदानामभावेऽपि श्लिष्टविशेषणैरेवाक्षिप्तोपमा प्रतीयते । एवंजातीयकाः श्लिष्टोक्तियोग्यस्य पदस्य पृथगुपादानेऽन्येऽपि भेदाः संभवन्ति । तेऽपि अनयैव दिशा द्रष्टव्याः ।

## (१९) आक्षेपः

निषेधो वक्तुमिष्टस्य यो विशेषाभिधित्सया ॥२०॥

वक्ष्यमाणोक्तविषयः स आक्षेपो द्विधा मतः ।

विवक्षितस्य प्राकरणिकत्वादनुपसर्जनीकार्यस्य अशक्यवक्तव्यत्वमतिप्रसिद्धत्वं वा विशेषं वक्तुं निषेधो, निषेध इव, यः स वक्ष्यमाणविषय उक्तविषयश्चेति द्विधा आक्षेपः । क्रमेणोदाहरणम्—

ए एहि किंपि कीएवि कएण णिक्किव भणामि अलमह वा ।
अविआरिअकज्जारम्भआरिणी मरउ ण भणिस्सम् ॥८०॥

[ए एहि किमपि कस्या अपि कृते निष्कृप भणामि अलमथ वा ।
अविचारितकार्यारम्भकारिणी म्रियतां न भणिष्यामि ॥ ]

ज्योत्स्ना मौक्तिकदाम चन्दनरसः शीतांशुकान्तद्रवः
कर्पूरं कदली मृणालवलयान्यम्भोजिनीपल्लवाः ।
अन्तर्मानसमास्त्वया प्रभवता तस्याः स्फुलिङ्गोत्कर-
व्यापाराय भवन्ति हन्त किमनेनोक्तेन न ब्रूमहे ॥८१॥

( २० ) विभावना

क्रियायाः प्रतिषेधेऽपि फलव्यक्तिर्विभावना ॥२१॥

हेतुरूपक्रियायाः निषेधेऽपि तत्फलप्रकाशनं विभावना । यथा—

कुसुमितलताभिरहताप्यधत्त रुजमलिकुलैरदष्टापि ।
परिवर्तते स्म नलिनीलहरीभिरलोलिताप्यघूर्णत सा ॥८२॥

( २१ ) विशेषोक्तिः

विशेषोक्तिरखण्डेषु कारणेषु फलावचः ।

मिलितेष्वपि कारणेषु कार्यस्याकथनं विशेषोक्तिः । अनुक्त-निमित्ता, उक्तनिमित्ता, अचिन्त्यनिमित्ता च । क्रमेणोदाहरणम्—

निद्रानिवृत्तावुदिते द्युरत्ने सखीजने द्वारपदं पराप्ते ।
श्लथीकृताश्लेषरसे भुजङ्गे चचाल नालिङ्गनतोऽङ्गना सा ॥८३॥

कर्पूर इव दग्धोऽपि शक्तिमान् यो जने जने ।
नमोऽस्त्ववार्यवीर्याय तस्मै मकरकेतवे ॥ ८४ ॥

स एकस्त्रीणि जयति जगन्ति कुसुमायुधः ।
हरतापि तनुं यस्य शंभुना न हृतं बलम् ॥ ८५ ॥

## ( २२ ) यथासंख्यम्

यथासंख्यं क्रमेणैव क्रमिकाणां समन्वयः ॥ २२ ॥

यथा—

एकस्त्रिधा वससि चेतसि चित्रमत्र
देव द्विषां च विदुषां च मृगीदृशां च ।
तापं च संमदरसं च रतिं च पुष्णन्
शौर्योष्मणा च विनयेन च लीलया च ॥ ८६ ॥

## ( २३ ) अर्थान्तरन्यासः

सामान्यं वा विशेषो वा तदन्येन समर्थ्यते ।
यत्र सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा ॥ २३ ॥

साधर्म्येण वैधर्म्येण वा सामान्यं विशेषेण यत् समर्थ्यते, विशेषो वा सामान्येन, सोऽर्थान्तरन्यासः । क्रमेणोदाहरणम्—

निजदोषावृतमनसामतिसुन्दरमेव भाति विपरीतम् ।
पश्यति पित्तोपहतः शशिशुभ्रं शङ्खमपि पीतम् ॥ ८७ ॥

सुसितवसनालंकारायां कदाचन कौमुदी-
महसि सुदृशि स्वैरं यान्त्यां गतोऽस्तमभूद् विधुः ।
तदनु भवतः कीर्तिः केनाप्यगीयत, येन सा
प्रियगृहमगान्मुक्ताशङ्का, क नासि शुभप्रदः ॥ ८८ ॥

गुणानामेव दौरात्म्याद् धुरि धुर्यो नियुज्यते ।
असंजातकिणस्कन्धः सुखं स्वपिति गौर्गलिः ॥ ८९ ॥

अहो हि मे बह्वपराद्धमायुषा यदप्रियं वाच्यमिदं मयेदृशम् ।
त एव धन्याः सुहृदः पराभवं जगत्यदृष्ट्वैव हि ये क्षयं गताः ॥ ९० ॥

## ( २४ ) विरोधः

विरोधः सोऽविरोधेऽपि विरुद्धत्वेन यद् वचः ।

वस्तुवृत्तेनाविरोधेऽपि विरुद्धयोरिव यदभिधानं स विरोधः ।

जातिश्चतुर्भिर्जात्याद्यैर्विरुद्धा स्याद् गुणस्त्रिभिः ॥ २४ ॥
क्रिया द्वाभ्यामथ द्रव्यं द्रव्येणैवेति ते दश ।

क्रमेणोदाहरणम्—

अभिनवनलिनीकिसलयमृणालवलयादि दवदहनराशिः ।
सुभग कुरङ्गदृशोऽस्या विधिवशतस्त्वद्वियोगपविपाते ॥९१॥

गिरयोऽप्यनुन्नतियुजो मरुदप्यचलोऽब्धयोऽप्यगम्भीराः ।
विश्वंभराऽप्यतिलघुर्नरनाथ तवान्तिके नियतम् ॥९२॥

येषां कण्ठपरिग्रहप्रणयितां संप्राप्य धाराधर-
स्तीक्ष्णः सोऽप्यनुरज्यते च कमपि स्नेहं पराप्नोति च ।
तेषां संगरसङ्गसक्तमनसां राज्ञां त्वया भूपते
पांसूनां पटलैः प्रसाधनविधिर्निर्वर्त्यते कौतुकम् ॥९३॥

सृजति च जगदिदमवति च संहरति च हेलयैव यो नियतम् ।
अवसरवशतः शफरो जनार्दनः सोऽपि चित्रमिदम् ॥९४॥

सततं मुसलासक्ता बहुतरगृहकर्मघटनया नृपते ।
द्विजपत्नीनां कठिनाः सति भवति कराः सरोजसुकुमाराः ॥९५॥

पेशलमपि खलवचनं दहतितरां मानसं सतत्त्वविदाम्[1] ।
परुषमपि सुजनवाक्यं मलयजरसवत् प्रमोदयति ॥९६॥

क्रौञ्चाद्रिरुद्दामदृषद्दृढोऽसौ यन्मार्गणानर्गलशातपाते ।
अभून्नवाम्भोजदलाभिजातः स भार्गवः सत्यमपूर्वसर्गः ॥९७॥

परिच्छेदातीतः सकलवचनानामविषयः
पुनर्जन्मन्यस्मिन्ननुभवपथं यो न गतवान् ।
विवेकप्रध्वंसादुपचितमहामोहगहनो
विकारः कोऽप्यन्तर्जडयति च तापं च कुरुते ॥९८॥

अयं वारामेको निलय इति रत्नाकर इति
श्रितोऽस्माभिस्तृष्णातरलितमनोभिर्जलनिधिः ।
क एवं जानीते निजकरपुटीकोटरगतं
क्षणादेनं ताम्यत्तिमिमकरमापास्यति मुनिः ॥ ९९ ॥

---

१ 'सुतत्त्व०' इत्यपि पाठः ।

समदमतङ्गजमदजलनिस्यन्दतरङ्गिणीपरिष्वङ्गात् ।
क्षितितिलक त्वयि तटजुषि शंकरचूडापगापि कालिन्दी ॥१००॥

### ( २५ ) स्वभावोक्तिः

स्वभावोक्तिस्तु डिम्भादेः स्वक्रियारूपवर्णनम् ॥ २५ ॥

स्वयोस्तदेकाश्रययोः । रूपं वर्णः संस्थानं च । उदाहरणम्–

पश्चादङ्घ्री प्रसार्य त्रिकनतिविततः द्राघयित्वाङ्गमुच्चै-
रासज्याभुग्नकण्ठो मुखमुरसि सटां धूलिधूम्रां विधूय ।
घासग्रासाभिलाषादनवरतचलत्प्रोथतुण्डस्तुरङ्गो
मन्दं शब्दायमानो विलिखति शयनादुत्थितः क्ष्मां खुरेण ॥१०१॥

### ( २६ ) व्याजस्तुतिः

व्याजस्तुतिर्मुखे निन्दा स्तुतिर्वा रूढिरन्यथा ।

व्याजेन व्याजरूपा वा स्तुतिः । क्रमेणोदाहरणम्—

हित्वा त्वामुपरोधवन्ध्यमनसां मन्ये न मौलिः परो
लज्जावर्जनमन्तरेण न रमामन्यत्र संदृश्यते ।
यस्त्यागं तनुतेतरां मुखशतैरेत्याश्रितायाः श्रियः
प्राप्य त्यागकृतावमाननमपि त्वय्येव यस्याः स्थितिः ॥१०२॥

हे हेलाजितबोधिसत्त्व वचसां किं विस्तरैस्तोयधे
नास्ति त्वत्सदृशः परः परहिताधाने गृहीतव्रतः ।
तृष्यत्पान्थजनोपकारघटनावैमुख्यलब्धायशो-
भारप्रोद्वहने करोषि कृपया साहायकं यन्मरोः ॥ १०३ ॥

### ( २७ ) सहोक्तिः

सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकम् ॥२६॥

एकार्थाभिधायकमपि सहार्थबलात् यत् उभयस्यावगमकं सा सहोक्तिः ।

१ ‘ व्याजरूपा व्याजेन वा ’ इति प्रायः सर्वेषु मुद्रित पुस्तकेषु पाठः ।

यथा—

सह दिअहणिसाहिं दीहरा सासदण्डा
सह मणिवलयेहिं वाप्पधारा गलन्ति।
तुह सुहअ विओए तीअ उव्विग्गिरीए
सह अ तणुलदाए दुब्बला जीविदासा ॥१०४॥

[सह दिवसनिशाभिर्दीर्घाः श्वासदण्डाः
सह मणिवलयैर्बाष्पधारा गलन्ति।
तव सुभग वियोगे तस्या उद्विग्नायाः
सह च तनुलतया दुर्बला जीविताशा।]

श्वासदण्डादिगतं दीर्घत्वादि शाब्दम्, दिवसनिशादिगतं तु सहार्थसामर्थ्यात् प्रतिपद्यते।

## (२८) विनोक्तिः

विनोक्तिः सा विनान्येन यत्रान्यः सन्न नेतरः।

क्वचिदशोभनः, क्वचिच्छोभनः। क्रमेणोदाहरणम् —

अरुचिर्निशया विना शशी शशिना सापि विना महत् तमः।
उभयेन विना मनोभवस्फुरितं नैव चकास्ति कामिनोः ॥१०५॥
मृगलोचनया विना विचित्रव्यवहारप्रतिभाप्रभाप्रगल्भः।
अमृतद्युतिसुन्दराशयोऽयं सुहृदा तेन विना नरेन्द्रसूनुः ॥१०६॥

## (२९) परिवृत्तिः

परिवृत्तिर्विनिमयो योऽर्थानां स्यात् समासमैः ॥२७॥

परिवृत्तिरलंकारः। उदाहरणम्—

लतानामेतासामुदितकुसुमानां मरुदयं
मतं लास्यं दत्वा श्रयति भृशमामोदमसमम्।
लतास्त्वध्वन्यानामहह दृशमादाय सहसा
ददत्याधिव्याधिभ्रमिरुदितमोहव्यतिकरम् ॥१०७॥

अत्र प्रथमेऽर्धे समेन समस्य, द्वितीये उत्तमेन न्यूनस्य।

नानाविधप्रहरणैर्नृप संप्रहारे
स्वीकृत्य दारुणनिनादवतः प्रहारान् ।
दृप्तारिवीरविसरेण वसुंधरेयं
निर्विप्रलम्भपरिरम्भविधिर्वितीर्णा ॥ १०८ ॥

अत्र न्यूनेनोत्तमस्य ।

## ( ३० ) भाविकम्

**प्रत्यक्षा इव यद् भावाः क्रियन्ते भूतभाविनः ।**
**तद् भाविकम्**

भूताश्च भाविनश्चेति द्वन्द्वः । भावः कवेरभिप्रायोऽत्रास्तीति भाविकम् । उदाहरणम् —

आसीदञ्जनमत्रेति पश्यामि तव लोचने ।
भाविभूषणसंभारां साक्षात्कुर्वे तवाकृतिम् ॥ १०९ ॥

अत्र आद्ये भूतस्य, द्वितीये भाविनो दर्शनम् ।

## ( ३१ ) काव्यलिङ्गम् ।

**काव्यलिङ्गं हेतोर्वाक्यपदार्थता ॥ २८ ॥**

वाक्यार्थता यथा—

वपुःप्रादुर्भावादनुमितमिदं जन्मनि पुरा
पुरारे न प्रायः क्वचिदपि भवन्तं प्रणतवान् ।
नमन्मुक्तः संप्रत्यहमतनुरग्रेऽप्यनतिभाक्
महेश क्षन्तव्यं तदिदमपराधद्वयमपि ॥ ११० ॥

अनेकपदार्थता यथा—

प्रणयिसखीसलीलपरिहासरसाधिगतैः
ललितशिरीषपुष्पहननैरपि ताम्यति यत् ।
वपुषि वधाय तत्र तव शस्त्रमुपक्षिपतः
पततु शिरस्यकाण्डयमदण्ड इवैष भुजः ॥ १११ ॥

एकपदार्थता यथा—

भस्मोद्धूलन भद्रमस्तु भवते रुद्राक्षमाले शुभं
हा सोपानपरम्परां गिरिसुताकान्तालयालंकृतिम् ।
अद्याराधनतोषितेन विभुना युष्मत्सपर्यासुखा-
लोकोच्छेदिनि मोक्षनामनि महामोहे निधीयामहे ॥११२॥

एषु अपराधद्वये पूर्वापरजन्मनोरनमनम्, भुजपाते शस्त्रोपक्षेपः महामोहे सुखालोकोच्छेदित्वं च यथाक्रममुक्तरूपो हेतुः ।

## ( ३२ ) पर्यायोक्तम्

पर्यायोक्तं विना वाच्यवाचकत्वेन यद् वचः ।

वाच्यवाचकभावव्यतिरिक्तेनावगमनव्यापारेण यत् प्रतिपादनम्, तत् पर्यायेण भङ्ग्यन्तरेण कथनात् पर्यायोक्तम् । उदाहरणम्—

यं प्रेक्ष्य चिररूढापि निवासप्रीतिरुज्झिता ।
मदेनैरावणमुखे मानेन हृदये हरेः ॥११३॥

अत्र 'ऐरावणशक्रौ मदमानमुक्तौ जातौ' इति व्यङ्ग्यमपि शब्देनोच्यते । तेन यदेवोच्यते तदेव व्यङ्ग्यम् । यथा तु व्यङ्ग्यं न तथोच्यते । यथा गवि शुक्ले चलति दृष्टे 'गौः शुक्लश्चलति' इति विकल्पः । यदेव दृष्टं तदेव विकल्पयति, न तु यथा दृष्टं तथा । यतोऽभिन्नासंसृष्टत्वेन दृष्टं भेदसंसर्गाभ्यां विकल्पयति ।

## ( ३३ ) उदात्तम्

उदात्तं वस्तुनः संपत्, महतां चोपलक्षणम् ॥२९॥

संपत् समृद्धियोगः । यथा—

मुक्ताः केलिविसूत्रहारगलिताः संमार्जनीभिर्हृताः
प्रातः प्राङ्गणसीम्नि मन्थरचलद्बालाङ्घ्रिलाक्षारुणाः ।
दूराद् दाडिमबीजशङ्कितधियः कर्षन्ति केलीशुकाः
यद् विद्वद्भवनेषु भोजनृपतेस्तत् त्यागलीलायितम् ॥११४॥

उपलक्षणमङ्गभावः, अर्थादुपलक्षणीयेऽर्थे। उदाहरणम्-

तदिदमरण्यं यस्मिन् दशरथवचनानुपालनव्यसनी।
निवसन् बाहुसहायश्चकार रक्षःक्षयं रामः ॥११५॥

न चात्र वीरो रसः, तस्येहाङ्गत्वात्।

( ३४ ) समुच्चयः

तत्सिद्धिहेतावेकस्मिन् यत्रान्यत् तत्करं भवेत्।
समुच्चयोऽसौ

तस्य प्रस्तुतस्य कार्यस्य एकस्मिन् साधके स्थिते साधकान्तराणि तत्र संभवन्ति, स समुच्चयः। उदाहरणम्—

दुर्वाराः स्मरमार्गणाः प्रियतमो दूरे मनोऽत्युत्सुकं
गाढं प्रेम नवं वयोऽतिकठिनाः प्राणाः कुलं निर्मलम्।
स्त्रीत्वं धैर्यविरोधि मन्मथसुहृत्कालः कृतान्तोऽक्षमो
नो सख्यश्चतुराः कथं नु विरहः सोढव्य इत्थं शठः ॥११६॥

अत्र विरहासहत्वं स्मरमार्गणा एव कुर्वन्ति, तदुपरि प्रियतमदूरस्थित्यादि उपात्तम्।

एष एव समुच्चयः सद्योगेऽसद्योगे सदसद्योगे च पर्यवस्यतीति न पृथक् लक्ष्यते। तथाहि—

कुलममलिनं भद्रा मूर्तिर्मतिः श्रुतशालिनी
भुजबलमलं स्फीता लक्ष्मीः प्रभुत्वमखण्डितम्।
प्रकृतिसुभगा ह्येते भावा अमीभिरयं जनो
व्रजति सुतरां दर्पं राजंस्त एव तवाङ्कुशाः ॥ ११७ ॥

अत्र सतां योगः। उक्तोदाहरणे त्वसतां योगः।

शशी दिवसधूसरो गलितयौवना कामिनी
सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः।
प्रभुर्धनपरायणः सततदुर्गतः सज्जनो
नृपाङ्गणगतः खलो मनसि सप्त शल्यानि मे ॥ ११८ ॥

अत्र शशिनि धूसरे शल्ये शल्यान्तराणीति शोभनाशोभनयोगः।

स त्वन्यो युगपद् या गुणक्रियाः ॥ ३० ॥

गुणौ च क्रिये च गुणक्रिये च गुणक्रियाः । क्रमेणोदाहरणम्—

विदलितसकलारिकुलं तव बलमिदमभवदाशु विमलं च ।
प्रखलमुखानि नराधिप मलिनानि च तानि जातानि ॥११९॥

अयमेकपदे तया वियोगः प्रियया चोपनतः सुदुःसहो मे ।
नववारिधरोदयादहोभिर्भवितव्यं च निरातपत्वरम्यैः ॥१२०॥

कलुषं च तवाहितेष्वकस्मात् सितपङ्केरुहसोदरश्रि चक्षुः ।
पतितं च महीपतीन्द्र तेषां वपुषि प्रस्फुटमापदां कटाक्षैः॥१२१॥

'धुनोति चासिं तनुते च कीर्तिम्'—इत्यादेः, 'कृपाणपाणिश्च भवान् रणक्षितौ ससाधुवादाश्च सुराः सुरालये'— इत्यादेश्च दर्शनात्, 'व्यधिकरणे' इति 'एकस्मिन् देशे' इति च न वाच्यम्।

## (३५) पर्यायः

### एकं क्रमेणानेकस्मिन् पर्यायः

एकं वस्तु क्रमेणानेकस्मिन् भवति क्रियते वा, स पर्यायः । क्रमेणोदाहरणम्—

नन्वाश्रयस्थितिरियं तव कालकूट
केनोत्तरोत्तरविशिष्टपदोपदिष्टा ।
प्रागर्णवस्य हृदये वृषलक्ष्मणोऽथ
कण्ठेऽधुना वससि वाचि पुनः खलानाम् ॥१२२॥

यथा वा—

बिम्बोष्ठ एव रागस्ते तन्वि पूर्वमदृश्यत ।
अधुना हृदयेऽप्येष मृगशावाक्षि लक्ष्यते ॥१२३॥

रागस्य वस्तुतो भेदेऽप्येकतयाध्यवसितत्वादेकत्वमविरुद्धम् ।

तं ताण सिरिसहोअररअणाहरणम्मि हिअअमेक्करसम् ।
बिम्बाहरे पिआणं णिवेसिअं कुसुमबाणेण ॥१२४॥

[ तत् तेषां श्रीसहोदररत्नाभरणे हृदयमेकरसम् ।
बिम्बाधरे प्रियाणां निवेशितं कुसुमबाणेन ॥ ]

अन्यस्ततोऽन्यथा ।

अनेकमेकस्मिन् क्रमेण भवति क्रियते वा, सोऽन्यः ।
क्रमेणोदाहरणम्—

मधुरिमरुचिरं वचः खलानाममृतमहो प्रथमं पृथु व्यनक्ति ।
अथ कथयति मोहहेतुमन्तर्गतमिव हालहलं विषं तदेव ॥१२५॥

तद् गेहं नतभित्ति मन्दिरमिदं लब्धावकाशं दिवः
सा धेनुर्जरती नदन्ति करिणामेता घनाभा घटाः ।
स क्षुद्रो मुसलध्वनिः कलमिदं संगीतकं योषिताम्
आश्चर्यं दिवसैर्द्विजोऽयमियतीं भूमिं समारोपितः ॥ १२६ ॥

अत्र एकस्यैव हानोपादानयोरविवक्षितत्वात् न परिवृत्तिः ।

## ( ३६ ) अनुमानम्

अनुमानं तदुक्तं यत् साध्यसाधनयोर्वचः ॥ ३१ ॥

पक्षधर्मान्वयव्यतिरेकित्वेन त्रिरूपो हेतुः साधनम् । धर्मिणि अयोगव्यवच्छेदो व्यापकस्य साध्यम् । यथा—

यत्रैता लहरीचलाचलदृशो व्यापारयन्ति भ्रुवं
यत् तत्रैव पतन्ति संततममी मर्मस्पृशो मार्गणाः ।
तच्चक्रीकृतचापमञ्चितशरप्रेङ्खत्करः क्रोधनो
धावत्यग्रत एव शासनधरः सत्यं सदासां स्मरः ॥१२७॥

साध्यसाधनयोः पौर्वापर्यविकल्पे न किंचिद् वैचित्र्यमिति न तथा दर्शितम् ।

## ( ३७ ) परिकरः

विशेषणैर्यत् साकूतैरुक्तिः परिकरस्तु सः ।

अर्थाद्विशेष्यस्य । उदाहरणम्—

महौजसो मानधना धनार्चिता
धनुर्भृतः संयति लब्धकीर्तयः ।
न संहतास्तस्य न भेदवृत्तयः
प्रियाणि वाञ्छन्त्यसुभिः समीहितुम् ॥ १२८ ॥

यद्यप्यपुष्टार्थस्य दोषताभिधानात् तन्निराकरणेन पुष्टार्थस्वीकारः कृतः, तथाप्येकनिष्ठत्वेन बहूनां विशेषणानामेवमुपन्यासे वैचित्र्यमित्यलंकारमध्ये गणितः ।

## ( ३८ ) व्याजोक्तिः

व्याजोक्तिश्छद्मनोद्भिन्नवस्तुरूपनिगूहनम् ॥ ३२ ॥

निगूढमपि वस्तुनो रूपं कथमपि प्रभिन्नं केनापि व्यपदेशेन यदपह्नूयते, सा व्याजोक्तिः । न चैषापह्नुतिः, प्रकृताप्रकृतोभयनिष्ठस्य साम्यस्येहासंभवात् । उदाहरणम्—

शैलेन्द्रप्रतिपाद्यमानगिरिजाहस्तोपगूढोल्लस-
द्रोमाञ्चादिविसंष्ठुलाखिलविधिव्यासङ्गभङ्गाकुलः ।
हा शैत्यं तुहिनाचलस्य करयोरित्यूचिवान् सस्मितं
शैलान्तःपुरमातृमण्डलगणैर्दृष्टोऽवताद् वः शिवः ॥१२९॥

अत्र पुलकवेपथू सात्त्विकरूपतया प्रसृतौ शैत्यकारणतया प्रकाशितत्वादपलपितस्वरूपौ व्याजोक्तिं प्रयोजयतः ।

## ( ३९ ) परिसंख्या

किंचित् पृष्टमपृष्टं वा कथितं यत् प्रकल्पते ।
तादृगन्यव्यपोहाय परिसंख्या तु सा स्मृता ॥३३॥

प्रमाणान्तरावगतमपि वस्तु शब्देन प्रतिपादितं प्रयोजनान्तराभावात् सदृशवस्त्वन्तरव्यवच्छेदाय यत् पर्यवस्यति, सा भवेत् परिसंख्या। अत्र च कथनं प्रश्नपूर्वकं तदन्यथा च परिदृष्टम्। तथा उभयत्र व्यपोह्यमानस्य प्रतीयमानता वाच्यत्वं चेति चत्वारो भेदाः।

क्रमेणोदाहरणम्—

किमासेव्यं पुंसां सविधमनवद्यं द्युसरितः
किमेकान्ते ध्येयं चरणयुगलं कौस्तुभभृतः।
किमाराध्यं पुण्यं किमभिलषणीयं च करुणा
यदासक्त्या चेतो निरवधिविमुक्त्यै प्रभवति ॥१३०॥

किं भूषणं सुदृढमत्र यशो न रत्नं
किं कार्यमार्यचरितं सुकृतं न दोषः।
किं चक्षुरप्रतिहतं धिषणा न नेत्रं
जानाति कस्त्वदपरः सदसद्विवेकम् ॥ १३१ ॥

कौटिल्यं कचनिचये करचरणाधरदलेषु रागस्ते।
काठिन्यं कुचयुगले तरलत्वं नयनयोर्वसति ॥ १३२ ॥

भक्तिर्भवे न विभवे व्यसनं शास्त्रे न युवतिकामास्त्रे।
चिन्ता यशसि न वपुषि प्रायः परिदृश्यते महताम् ॥१३३॥

## (४०) कारणमाला

यथोत्तरं चेत् पूर्वस्य पूर्वस्यार्थस्य हेतुता।
तदा कारणमाला स्यात्

उत्तरमुत्तरं प्रति यथोत्तरम्। उदाहरणम्—

जितेन्द्रियत्वं विनयस्य कारणं गुणप्रकर्षो विनयादवाप्यते।
गुणप्रकर्षेण जनोऽनुरज्यते जनानुरागप्रभवा हि संपदः ॥१३४॥

'हेतुमता सह हेतोरभिधानमभेदतो हेतुः'

इति हेत्वलंकारोऽत्र न लक्षितः। आयुर्घृतमित्यादिरूपो ह्येष न भूषणतां कदाचिदर्हति, वैचित्र्याभावात्।

अविरलकमलविकासः सकलालिमदश्च कोकिलानन्दः।
रम्योऽयमेति संप्रति लोकोत्कण्ठाकरः कालः ॥ १३५ ॥

इत्यत्र काव्यरूपतां कोमलानुप्राससमाहिम्नैव समाम्नासिषुः, न तु हेत्वलंकारकल्पनया –इति पूर्वोक्तं काव्यलिङ्गमेव हेतुः ।

### ( ४१ ) अन्योन्यम्

क्रियया तु परस्परम् ॥३४॥

वस्तुनोर्जननेऽन्योन्यम्

अर्थयोरेकक्रियामुखेन परस्परं कारणत्वे सति अन्योन्यं नामालंकारः । उदाहरणम्—

हंसाण सरेहिँ सिरी सारिज्जइ अह सराण हंसेहिँ ।
अण्णोण्णं विअ एए अप्पाणं णवर गरुअन्ति ॥ १३६ ॥

[ हंसानां सरोभिः श्रीः सार्यतेऽथ सरसां हंसैः ।
अन्योन्यमेव एते आत्मानं केवलं गरयन्ति ॥ ]

अत्रोभयेषामपि परस्परं जनकता, मिथःश्रीसारतासंपादनद्वारेण ।

### ( ४२ ) उत्तरम्

उत्तरश्रुतिमात्रतः ।
प्रश्नस्योन्नयनं यत्र क्रियते, तत्र वा सति ॥३५॥
असकृद् यदसंभाव्यमुत्तरं स्यात् तदुत्तरम् ।

प्रतिवचनोपलम्भादेव पूर्ववाक्यं यत्र कल्प्यते तदेकं तावदुत्तरम् । उदाहरणम्—

वाणिअअ हत्थिदन्ता कुत्तो अम्हाण वग्घकित्ती अ ।
जाव लुलिआलअमुही घरम्मि परिसक्कए सोह्ना ॥ १३७ ॥

[ वाणिजक हस्तिदन्ताः कुतोऽस्माकं व्याघ्रकृत्तयश्च ।
यावत् लुलितालकमुखी गृहे परिसंक्रामति स्नुषा ॥ ]

हस्तिदन्तव्याघ्रकृत्तीनामहमर्थी, ताः मूल्येन प्रयच्छेति क्रेतुर्वचनम् अमुना वाक्येन समुन्नीयते ।

न चैतत् काव्यलिङ्गम्। उत्तरस्य तादृप्यानुपपत्तेः। न हि प्रश्नस्य प्रतिवचनं जनको हेतुः। नापीदमनुमानम्। एकधर्मिनिष्ठतया साध्यसाधनयोरनिर्देशाद् इत्यलंकारान्तरमेवोत्तरं साधीयः।

प्रश्नादनन्तरं लोकातिक्रान्तगोचरतया यत् असंभाव्यरूपं प्रतिवचनं स्यात्, तत् अपरमुत्तरम्। अनयोश्च सकृदुपादाने न चारुताप्रतीतिरित्यसकृदित्युक्तम्। उदाहरणम्—

का विसमा देवगई किं दुलहं जं जणो गुणग्गाही।
किं सोक्खं सुकलत्तं किं दुक्खं जं खलो लोओ ॥ १३८ ॥
[ का विषमा दैवगतिः किं दुर्लभं यज्जनो गुणग्राही।
किं सौख्यं सुकलत्रं किं दुःखं यत् खलो लोकः ॥ ]

प्रश्नपरिसंख्यायामन्यव्यपोहे एव तात्पर्यम्, इह तु वाच्ये एव विश्रान्तिरित्यनयोर्विवेकः।

## ( ४३ ) सूक्ष्मम्

**कुतोऽपि लक्षितः सूक्ष्मोप्यर्थोऽन्यस्मै प्रकाश्यते ॥ ३६ ॥**
**धर्मेण केनचिद् यत्र तत् सूक्ष्मं परिचक्षते।**

कुतोऽपि आकारादिङ्गिताद्वा। सूक्ष्मस्तीक्ष्णमतिसंवेद्यः। उदाहरणम्—

वक्रस्यन्दिस्वेदबिन्दुप्रबन्धै—
र्दृष्ट्वा भिन्नं कुङ्कुमं कापि कण्ठे।
पुंस्त्वं तन्व्या व्यञ्जयन्ती वयस्या
स्मित्वा पाणौ खड्गलेखां लिलेख ॥ १३९ ॥

अत्र आकृतिमालोक्य कयापि वितर्कितं पुरुषायितम् असिलतालेखनेन वैदग्ध्यादभिव्यक्तिमुपनीतम्। पुंसामेव कृपाणपाणिता, योग्यत्वात्। यथा वा—

संकेतकालमनसं विटं ज्ञात्वा विदग्धया।
हसन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम् ॥ १४० ॥

अत्र जिज्ञासितः संकेतकालः कयाचिदिङ्गितमात्रेण विदितो निशासमयशंसिना कमलनिमीलनेन लीलया प्रतिपादितः।

2030 ... 9६९९

## (४४) सारः

उत्तरोत्तरमुत्कर्षो भवेत् सारः परावधिः ॥ ३७ ॥

परः पर्यन्तभागः अवधिर्यस्य, धाराधिरोहितया तत्रैवोत्कर्षस्य विश्रान्तेः। उदाहरणम्—

राज्ये सारं वसुधा वसुधायां पुरं पुरे सौधम्।
सौधे तल्पं तल्पे वराङ्गनानङ्गसर्वस्वम् ॥ १४१ ॥

## (४५) असंगतिः

भिन्नदेशतयात्यन्तं कार्यकारणभूतयोः।
युगपद् धर्मयोर्यत्र ख्यातिः सा स्यादसंगतिः ॥ ३८ ॥

इह यद्देशं कारणम्, तद्देशमेव कार्यमुत्पद्यमानं दृष्टम्, यथा धूमादि। यत्र तु हेतुफलरूपयोरपि धर्मयोः केनाप्यतिशयेन नानादेशतया युगपदवभासनम्, सा तयोः स्वभावोत्पन्नपरस्परसंगतित्यागात् असंगतिः। उदाहरणम्—

जस्सेअ वणो तस्सेअ वेअणा भणइ तं जणो अलिअम्।
दन्तक्खअं कवोले वहूए वेअणा सवत्तीणम् ॥ १४२ ॥

[ यस्यैव व्रणस्तस्यैव वेदना भणति तज्जनोऽलीकम्।
दन्तक्षतं कपोले वध्वा वेदना सपत्नीनाम् ॥ ]

एषा च विरोधबाधिनी न विरोधः। भिन्नाधारतयैव द्वयोरिह विरोधितायाः प्रतिभासनात्। विरोधे तु विरोधित्वम् एकाश्रयनिष्ठमनुक्तमपि पर्यवसितम्। अपवादविषयपरिहारेणोत्सर्गस्य व्यवस्थितेः। तथा चैवं निदर्शितम्।

## (४६) समाधिः

समाधिः सुकरं कार्यं कारणान्तरयोगतः ॥ ३९ ॥

साधनान्तरोपकृतेन कर्त्रा यद् अक्लेशेन कार्यमारब्धमाधीयते, स समाधिर्नाम। उदाहरणम्—

मानमस्या निराकर्तुं पादयोर्मे पतिष्यतः ।
उपकाराय दिष्ट्येदमुदीर्णं घनगर्जितम् ॥१४३॥

(४७) समम्

समं योग्यतया योगो यदि संभावितः क्वचित् ॥३९॥

इदमनयोः श्लाघ्यमिति योग्यतया संबन्धस्य नियतविषयमध्यवसानं चेत्, तदा समम् । तत् सद्योगेऽसद्योगे च । उदाहरणम्—

धातुः शिल्पातिशयनिकषस्थानमेषा मृगाक्षी
रूपे देवोऽप्ययमनुपमो दत्तपत्रः स्मरस्य ।
जातं दैवात् सदृशमनयोः संगतं यत् तदेतत्
शृंगारस्योपनतमधुना राज्यमेकातपत्रम् ॥ १४४ ॥

यथा वा—

चित्रं चित्रं बत बत महच्चित्रमेतद् विचित्रं
जातो दैवादुचितरचनासंविधाता विधाता ।
यन्निम्बानां परिणतफलस्फीतिरास्वादनीया
यच्चैतस्याः कवलनकलाकोविदः काकलोकः ॥ १४५ ॥

(४८) विषमः

क्वचिद् यदतिवैधर्म्यान्न श्लेषो घटनामियात् ।
कर्तुः क्रियाफलावाप्तिर्नैवानर्थश्च यद् भवेत् ॥४०॥
गुणक्रियाभ्यां कार्यस्य कारणस्य गुणक्रिये
क्रमेण च विरुद्धे यत् स एष विषमो मतः ॥४१॥

द्वयोरत्यन्तविलक्षणतया यत् अनुपपद्यमानतयैव योगः प्रतीयते, यच्च किंचिदारभमाणः कर्ता क्रियायाः प्रणाशात् न केवलमभीष्टं यत् तत् फलं न लभेत, यावदप्रार्थितमप्यनर्थं विषयमासादयेत्, तथा सत्यपि कार्यस्य कारणरूपानुकारे, यत् तयोर्गुणौ क्रिये च परस्परविरुद्धतां व्रजतः, स समविपर्ययात्मा चतूरूपो विषमः ।

क्रमेणोदाहरणम्—

शिरीषादपि मृद्वङ्गी क्वेयमायतलोचना ।
अयं क्व च कुकूलाग्निकर्कशो मदनानलः ॥ १४६ ॥

सिंहिकासुतसंत्रस्तः शशः शीतांशुमाश्रितः ।
जग्रसे साश्रयं तत्र तमन्यः सिंहिकासुतः ॥ १४७ ॥

सद्यःकरस्पर्शमवाप्य चित्रं रणे रणे यस्य कृपाणलेखा ।
तमालनीला शरदिन्दुपाण्डु यशस्त्रिलोक्याभरणं प्रसूते ॥१४८॥

आनन्दममन्दमिमं कुवलयदललोचने ददासि त्वम् ।
विरहस्त्वयैव जनितस्तापयतितरां शरीरं मे ॥ १४९ ॥

अत्रानन्ददानं शरीरतापेन विरुध्यते । एवम्—

विपुलेन सागरशयस्य कुक्षिणा भुवनानि यस्य पपिरे युगक्षये ।
मदविभ्रमासकलया पपे पुनः स पुरस्त्रियैकतमयैकया दृशा ॥१५०॥
इत्यादावपि विषमत्वं यथायोगमवगन्तव्यम् ।

## ( ४९ ) अधिकम्

महतोर्यन्महीयांसावाश्रिताश्रययोः क्रमात् ।
आश्रयाश्रयिणौ स्यातां तनुत्वेऽप्यधिकं तु तत् ॥४२॥

आश्रितम् आधेयम् । आश्रयस्तदाधारः । तयोर्महतोरपि विषये तदपेक्षया तनू अप्याश्रयाश्रयिणौ प्रस्तुतवस्तुप्रकर्षविवक्षया यथाक्रमं यत् अधिकतरतां व्रजतः, तदिदं द्विविधम् अधिकं नाम । क्रमेणोदाहरणम्—

अहो विशालं भूपाल भुवनत्रितयोदरम् ।
माति मातुमशक्योऽपि यशोराशिर्यदत्र ते ॥ १५१ ॥

युगान्तकालप्रातसंहृतात्मनो जगन्ति यस्यां सविकाशमासत ।
तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसंभवा मुदः ॥१५२॥

## ( ५० ) प्रत्यनीकम्

प्रतिपक्षमशक्तेन प्रतिकर्तुं तिरस्क्रिया ।
या तदीयस्य तत्स्तुत्यै प्रत्यनीकं तदुच्यते ॥४३॥

न्यक्कृतिपरमपि विपक्षं साक्षान्निरसितुमशक्तेन केनापि यत् तमेव प्रतिपक्षमुत्कर्षयितुं तदाश्रितस्य तिरस्करणम्, तत् अनीक-प्रतिनिधितुल्यत्वात् प्रत्यनीकमभिधीयते । यथानीके अभियोज्ये तत्प्रतिनिधीभूतमपरं मूढतया केनचिदभियुज्यते, तथेह प्रतियोगिनि विजेये तदीयोऽन्यो विजीयते इत्यर्थः । उदाहरणम्—

त्वं विनिर्जितमनोभवरूपः सा च सुन्दर भवत्यनुरक्ता ।
पञ्चभिर्युगपदेव शरैस्तां तापयत्यनुशयादिव कामः ॥१५३॥

यथा वा—

यस्य किंचिदपकर्तुमक्षमः कायनिग्रहगृहीतविग्रहः ।
कान्तवक्त्रसदृशाकृतिं कृती राहुरिन्दुमधुनापि बाधते ॥१५४॥

इन्दोरत्र तदीयता संबन्धिमुखसंबन्धात् ।

## ( ५१ ) मीलितम्

समेन लक्ष्मणा वस्तु वस्तुना यन्निगूह्यते ।
निजेनागन्तुना वापि तन्मीलितमिति स्मृतम् ॥४४॥

सहजम् आगन्तुकं वा किमपि साधारणं यत् लक्षणम्, तद्द्वारेण यत् किंचित् केनचित् वस्तुस्थित्यैव बलीयस्तया तिरोधीयते, तत् मीलितमिति द्विधा स्मरन्ति । क्रमेणोदाहरणम्—

अपाङ्गतरले दृशौ मधुरवक्रवर्णा गिरो
विलासभरमन्थरा गतिरतीव कान्तं मुखम् ।
इति स्फुरितमङ्गके मृगदृशां स्वतो लीलया
तदत्र न मदोदयः कृतपदोऽपि संलक्ष्यते ॥ १५५ ॥

अत्र दृक्तरलतादिकमङ्गस्य लिङ्गं स्वाभाविकम्, साधारणं च मदोदयेन, तत्राप्येतस्य दर्शनात् ।

ये कन्दरासु निवसन्ति सदा हिमाद्रे-
स्त्वत्पातशाङ्कितधियो विवशा द्विषस्ते ।
अप्यङ्गमुत्पुलकमुद्वहतां सकम्पं
तेषामहो बत भियां न बुधोऽप्यभिज्ञः ॥ १५६ ॥

अत्र तु सामर्थ्यादवसितस्य शैत्यस्य आगन्तुकत्वात् तत्प्रभवयोः कम्पपुलकयोरपि ताद्रूप्यं समानता च, भयेष्वपि तयोरुपलक्षितत्वात् ।

## ( ५२ ) एकावली

स्थाप्यतेऽपोह्यते वापि यथापूर्वं परं परम् ।
विशेषणतया यत्र वस्तु सैकावली द्विधा ॥ ४५ ॥

पूर्वं पूर्वं प्रति यत्रोत्तरोत्तरस्य वस्तुनो वीप्सया विशेषणभावेन स्थापनं निषेधो वा भवति, सा द्विधा बुधैरेकावली भण्यते । क्रमेणोदाहरणम्--

पुराणि यस्यां सवराङ्गनानि वराङ्गना रूपपुरस्कृताङ्ग्यः ।
रूपं समुन्मीलितसद्विलासमस्त्रं विलासाः कुसुमायुधस्य ॥१५७॥

न तज्जलं यन्न सुचारुपङ्कजं
न पङ्कजं तद् यदलीनषट्पदम् ।
न षट्पदोऽसौ कलगुञ्जितो न यो
न गुञ्जितं तन्न जहार यन्मनः ॥१५८॥

पूर्वत्र पुराणां वराङ्गनाः, तासामङ्गविशेषणमुखेन रूपम्, तस्य विलासाः, तेषामप्यस्त्रम्-इत्यमुना क्रमेण विशेषणं विधीयते। उत्तरत्र प्रतिषेधेऽप्येवं योज्यम् ।

## ( ५३ ) स्मरणम्

यथानुभवमर्थस्य दृष्टे तत्सदृशे स्मृतिः ।
स्मरणम्

यः पदार्थः केनचिदाकारेण नियतः यदाकदाचित् अनुभूतोऽभूत् स कालान्तरे स्मृतिप्रतिबोधाधायिनि तत्समाने वस्तुनि दृष्टे सति, यत् तथैव स्मर्यते, तत् भवेत् स्मरणम् । उदाहरणम्—

निम्ननाभिकुहरेषु यदम्भः प्लावितं चलदृशां लहरीभिः ।
तद्भवैः कुहरुतैः सुरनार्यः स्मारिताः सुरतकण्ठरुतानाम् ॥१५९॥

यथा वा—

करजुअगहिअजसोआत्थणमुहविणिवेसिआहरपुडस्स ।
संभरिअपञ्चजण्णस्स णमह कण्हस्स रोमञ्चम् ॥१६०॥

[ करयुगगृहीतयशोदास्तनमुखविनिवेशिताधरपुटस्य ।
संस्मृतपाञ्चजन्यस्य नमत कृष्णस्य रोमाञ्चम् । ]

## ( ५४ ) भ्रान्तिमान्

भ्रान्तिमान् अन्यसंवित् तत्तुल्यदर्शने ॥४६॥

तदिति अन्यत् अप्राकरणिकं निर्दिश्यते । तेन समानम् अर्थादिह प्राकरणिकम् आश्रीयते । तस्य तथाविधस्य दृष्टौ सत्यां, यत् अप्राकरणिकतया संवेदनम्, स भ्रान्तिमान् ।

न चैष रूपकं प्रथमातिशयोक्तिर्वा । तत्र वस्तुतो भ्रमस्याभावात् । इह च अर्थानुगमनेन संज्ञायाः प्रवृत्तेः तस्य स्पष्टमेव प्रतिपन्नत्वात् ।

उदाहरणम्—

कपाले मार्जारः पय इति कराँल्लेढि शशिन-
स्तरुच्छिद्रप्रोतान् बिसमिति करी संकलयति ।
रतान्ते तल्पस्थान् हरति वनिताप्यंशुकमिति
प्रभामत्तश्चन्द्रो जगदिदमहो विप्लवयति ॥ १६१ ॥

## ( ५५ ) प्रतीपम्

आक्षेप उपमानस्य प्रतीपमुपमेयता ।
तस्यैव यदि वा कल्प्या तिरस्कारनिबन्धना ॥४७॥

अस्य धुरं सुतरामुपमेयमेव वोढु प्रौढमिति कैमर्थ्येन यत् उपमानमाक्षिप्यते, यदपि तस्यैवोपमानतया प्रसिद्धस्य उपमानान्तरविवक्षयानादरार्थमुपमेयभावः कल्प्यते, तत् उपमेयस्योपमानप्रतिकूलवर्तित्वात् उभयरूपं प्रतीपम् । क्रमेणोदाहरणम्—

लावण्यौकसि सप्रतापगरिमण्यग्रेसरे त्यागिनां
देव त्वय्यवनीभरक्षमभुजे निष्पादिते वेधसा ।
इन्दुः किं घटितः किमेष विहितः पूषा किमुत्पादितं
चिन्तारत्नमहो मुधैव किममी सृष्टाः कुलक्ष्माभृतः ॥ १६२ ॥

ए एहि दाव सुन्दरि कण्णं दाऊण सुणसु वअणिज्जम् ।
तुज्झ मुहेण किसोअरि चंदो उअमिज्जइ जणेण ॥ १६३ ॥

[ अयि एहि तावत् सुन्दरि कर्णं दत्वा शृणुष्व वचनीयम् ।
तव मुखेन कृशोदरि चन्द्र उपमीयते जनेन ॥ ]

अत्र मुखेनोपमीयमानस्य शशिनः स्वल्पतरगुणत्वाद् उपमित्यनिष्पत्या 'वअणिज्जम्'—इति वचनीयपदाभिव्यङ्ग्यास्तिरस्कारः ।

क्वचित् तु निष्पन्नैवोपमितिक्रिया अनादरनिबन्धनम् ।

यथा—

गर्वमसंवाह्यमिमं लोचनयुगलेन किं वहसि मुग्धे ।
सन्तीदृशानि दिशि दिशि सरःसु ननु नीलनलिनानि ॥१६४

इहोपमेयीकरणमेवोत्पलानामनादरः ।

अनयैव रीत्या यत् असामान्यगुणयोगात् नोपमानभावमपि अनुभूतपूर्वि, तस्य तत्कल्पनायामपि भवति प्रतीपमिति प्रत्येतव्यम् ।

यथा—

अहमेव गुरुः सुदारुणानामिति हालाहल मा स्म तात दृप्यः ।
ननु सन्ति भवादृशानि भूयो भुवनेऽस्मिन् वचनानि दुर्जनानाम् ॥१६५

अत्र हालाहलस्योपमानत्वमसम्भाव्यमेवोपनिबद्धम् ।

## (५६) सामान्यम्

प्रस्तुतस्य यदन्येन गुणसाम्यविवक्षया ।
ऐकात्म्यं बध्यते योगात् तत् सामान्यमिति स्मृतम् ॥ ४८ ॥

अतादृशमपि तादृशतया विवक्षितुं यत् अप्रस्तुतार्थेन संपृक्त-मपरित्यक्तनिजगुणमेव तदेकात्मतया निबध्यते, तत् समानगुण-निबन्धनात् सामान्यम् । उदाहरणम्—

मलयजरसविलिप्ततनवो नवहारलताविभूषिताः
सिततरदन्तपत्रकृतवक्त्ररुचो रुचिरामलांशुकाः ।
शशभृति विततधाम्नि धवलयति धरामविभाव्यतां गताः
प्रियवसतिं प्रयान्ति सुखमेव निरस्तभियोऽभिसारिकाः ॥१६६॥

अत्र प्रस्तुततदन्ययोरन्यूनानतिरिक्ततया निबद्धं धवलत्वमे-कात्मताहेतुः । अत एव पृथग्भावेन न तयोरुपलक्षणम् ।

तथा वा —

वेत्रत्वचा तुल्यरुचां वधूनां कर्णाग्रतो गण्डतलागतानि ।
भृङ्गाः सहेलं यदि नापतिष्यन् कोऽवेदयिष्यन्नवचम्पकानि ॥१६७॥

अत्र निमित्तान्तरजनितापि नानात्वप्रतीतिः प्रथमप्रतिपन्नमभेदं न व्युदसितुमुत्सहते, प्रतीततत्वात्तस्य । प्रतीतेश्च बाधायोगात् ।

(५७) विशेषः

विना प्रसिद्धमाधारमाधेयस्य व्यवस्थितिः ।
एकात्मा युगपद् वृत्तिरेकस्यानेकगोचरा ॥४९॥

अन्यत् प्रकुर्वतः कार्यमशक्यस्यान्यवस्तुनः ।
तथैव करणं चेति विशेषस्त्रिविधः स्मृतः ॥ ५० ॥

प्रसिद्धाधारपरिहारेण यत् आधेयस्य विशिष्टा स्थितिरभिधीयते, स प्रथमो विशेषः । उदाहरणम्—

दिवमप्युपयातानामाकल्पमनल्पगुणगणा येषाम् ।
रमयन्ति जगन्ति गिरः कथमिव कवयो न ते वन्द्याः ॥१६८॥

एकमपि वस्तु यत् एकेनैव स्वभावेन युगपदनेकत्र वर्तते, स द्वितीयः । उदाहरणम्—

सा वसइ तुज्झ हिअए सा च्चिअ अच्छीसु सा अ वअणेसु ।
अह्मारिसाण सुन्दर ओआसो कत्थ पावाणम् ॥ १६९ ॥

[ सा वसति तव हृदये सैवाक्ष्णोः सैव वचनेषु ।
अस्मादृशीनां सुन्दर अवकाशः कुत्र पापानाम् ॥ ]

यदपि किंचिद्रभसेन आरभमाणस्तेनैव यत्नेनाशक्यमपि कार्यान्तरमारभते सोऽपरो विशेषः । उदाहरणम्—

स्फुरदद्भुतरूपमुत्प्रतापज्वलनं त्वां सृजतानवद्यविद्यम् ।
विधिना ससृजे नवो मनोभूर्भुवि सत्यं सविता बृहस्पतिश्च ॥१७०॥

यथा वा—

गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ ।
करुणाविमुखेन मृत्युना हरता त्वां वद किं न मे हृतम् ॥१७१॥

सर्वत्र एवंविधविषयेऽतिशयोक्तिरेव प्राणत्वेनावतिष्ठते, तां विना प्रायेणालंकारत्वायोगात् । अत एवोक्तम्—

सैषा सर्वैव ( v. l. सर्वत्र ) वक्रोक्तिरनयार्थो विभाव्यते ।
यत्नोऽस्यां कविभिः कार्यः कोऽलंकारोऽनया विना ॥इति॥

## ( ५८ ) तद्गुणः

स्वमुत्सृज्य गुणं योगादत्युज्ज्वलगुणस्य यत् ।
वस्तु तद्गुणतामेति भण्यते स तु तद्गुणः ॥५१॥

वस्तु तिरस्कृतनिजरूपं केनापि समीपगतेन प्रगुणतया स्वगुणसंपदोपरक्तं तत्प्रतिभासमेव यत् समासादयति, स तद्गुणः, तस्याप्रकृतस्य गुणोऽत्रास्तीति ।

उदाहरणम्—

विभिन्नवर्णा गरुडाग्रजेन सूर्यस्य रथ्याः परितः स्फुरन्त्या ।
रत्नैः पुनर्यत्र रुचा रुचं स्वामानिन्यिरे वंशकरीरनीलैः ॥१७२॥

अत्र रवितुरगापेक्षया गरुडाग्रजस्य, तदपेक्षया च हरिन्मणीनां प्रगुणवर्णता ।

## ( ५९ ) अतद्गुणः

तद्रूपाननुहारश्चेदस्य तत् स्यादतद्गुणः ।

यदि तु तदीयं वर्णं संभवन्त्यामपि योग्यतायाम इदं न्यूनगुणं न गृह्णीयात्, तदा भवेदतद्गुणो नाम । उदाहरणम्—

धवलोसि जह वि सुन्दर तह वि तुए मज्झ रञ्जिअं हिअअम् ।
राअभरिए वि हिअए सुहअ णिहित्तो ण रत्तोसि ॥१७३॥

[ धवलोऽसि यद्यपि सुन्दर तथापि त्वया मम रञ्जितं हृदयम् ।
रागभरितेऽपि हृदये सुभग निहितो न रक्तोऽसि ॥ ]

अत्रातिरक्तेनापि मनसा संयुक्तो न रक्ततामुपगत इत्यतद्गुणः ।

किं च तदिति अप्रकृतम् अस्येति च प्रकृतमत्र निर्दिश्यते । तेन यत् अप्रकृतस्य रूपं प्रकृतेन कुतोऽपि निमित्तात् नानुविधीयते, सोऽतद्गुण इत्यपि प्रतिपत्तव्यम् । यथा—

गाङ्गमम्बु सितमम्बु यामुनं कज्जलाभमुभयत्र मज्जतः ।
राजहंस तव सैव शुभ्रता चीयते न च न चापचीयते ॥१७४॥

## ( ६० ) व्याघातः

यद् यथा साधितं केनाप्यपरेण तदन्यथा ॥५२॥
तथैव यद् विधीयेत स व्याघात इति स्मृतः ।

येनोपायेन यत् एकेनोपकल्पितम्, तस्यान्येन जिगीषुतया तदुपायकमेव यत् अन्यथाकरणम्, स साधितवस्तुव्याहतिहेतुत्वात् व्याघातः । उदाहरणम्—

दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः ।
विरूपाक्षस्य जयिनीस्ताः स्तुवे वामलोचनाः ॥१७५॥

## ( ६१ ) संसृष्टिः

सेष्टा संसृष्टिरेतेषां भेदेन यदिह स्थितिः ॥ ५३ ॥

एतेषां समनन्तरमेवोक्तस्वरूपाणामलंकाराणां यथासंभवमन्योन्यनिरपेक्षतया यत् एकत्र, शब्दभागे एव, अर्थविषये एव, उभयत्रापि वा, अवस्थानम्, सा एकार्थसमवायस्वभावा संसृष्टिः ।

तत्र शब्दालंकारसंसृष्टिर्यथा—

वदनसौरभलोभपरिभ्रमद्भ्रमरसंभ्रमसंभृतशोभया ।
चलितया विदधे कलमेखलाकलकलोऽलकलोलदृशान्यया ॥१७६॥

अर्थालंकारसंसृष्टिस्तु—

लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ।
असत्पुरुषसेवेव दृष्टिर्विफलतां गता ॥ १७७ ॥

पूर्वत्र परस्परनिरपेक्षौ यमकानुप्रासौ संसृष्टिं प्रयोजयतः । उत्तरत्र तु तथाविधे उपमोत्प्रेक्षे ।

शब्दार्थालंकारयोस्तु संसृष्टिः—

सो णत्थि एत्थ गामे जो एअं महमहन्तलाअण्णम् ।
तरुणाण हिअअलूडिं परिसंप्पन्तीं णिवारेइ ॥ १७८ ॥

[ स नास्त्यत्र ग्रामे य एनां महमहायमानलावण्याम् ।
तरुणानां हृदयलुण्ठाकीं परिसर्पन्तीं निवारयति ॥ ]

अत्रानुप्रासो रूपकं चान्योन्यानपेक्षे । संसर्गश्च तयोरेकत्र वाक्ये छन्दसि वा समवेतत्वात् ।

## ( ६२ ) संकरः

अविश्रान्तिजुषामात्मन्यङ्गाङ्गित्वं तु संकरः ।

एते एव यदात्मनि अनासादितस्वतन्त्रभावाः परस्परम् अनुग्राह्यानुग्राहकतां दधति, स एषां संकीर्यमाणस्वरूपत्वात् संकरः ।

उदाहरणम्—

आत्ते सीमन्तरत्ने मरकतिनि हृते हेमताटङ्कपत्रे
लुप्तायां मेखलायां झटिति मणितुलाकोटियुग्मे गृहीते ।
शोणं बिम्बोष्ठकान्त्या त्वदरिमृगदृशामित्वरीणामरण्ये
राजन् गुञ्जाफलानां स्रज इति शबरा नैव हारं हरन्ति ॥१७९॥

अत्र तद्गुणमपेक्ष्य भ्रांतिमता प्रादुर्भूतम्, तदाश्रयेण च तद्गुणः सचेतसां प्रभूतचमत्कारनिमित्तमित्यनयोरङ्गाङ्गिभावः।

यथा वा—

जटाभाभिर्भाभिः करधृतकलङ्काक्षवलयो
वियोगिव्यापत्तेरिव कलितवैराग्यविशदः।
परिप्रेङ्खत्तारापरिकरकपालाङ्किततले
शशी भस्मापाण्डुः पितृवन इव व्योम्नि चरति ॥ १८० ॥

उपमा रूपकम् उत्प्रेक्षा श्लेषश्चेति चत्वारोऽत्र पूर्ववत् अङ्गाङ्गितया प्रतीयन्ते ।

कलङ्क एवाक्षवलयमिति रूपकपरिग्रहे करधृतत्वमेव साधकप्रमाणतां प्रतिपद्यते । अस्य हि रूपकत्वे तिरोहितकलङ्करूपम् अक्षवलयमेव मुख्यतयावगम्यते । तस्यैव च करग्रहणयोग्यतायां सार्वत्रिकी प्रसिद्धिः। श्लेषच्छायया तु कलङ्कस्य करधारणम् असदेव प्रत्यासत्या उपचर्य योज्यते। शशाङ्केन केवलं कलङ्कस्य मूर्त्यैव उद्वहनात्। कलङ्कोऽक्षवलयमिवेति तु उपमायां कलङ्कस्य उत्कटतया प्रतिपत्तिः। न चास्य करधृतत्वं तत्त्वतोऽस्तीति मुख्येऽप्युपचार एव शरणं स्यात्।

एवंरूपश्च संकरः शब्दालंकारयोरपि परिदृश्यते । यथा—

राजति तटीयमभिहत -दानव-रासातिपाति-साराव-नदा ।
गजता च यूथमविरत-दान-वरा सातिपाति सारा वनदा ॥१८१॥

अत्र यमकमनुलोमप्रतिलोमश्च चित्रभेदः पादद्वयगते परस्परापेक्षे ।

एकस्य च ग्रहे न्यायदोषाभावादनिश्चयः ॥ ५४ ॥

द्वयोर्बहूनां वा अलंकाराणामेकत्र समावेशोऽपि विरोधात् न यत्र युगपदवस्थानम्, न चैकतरस्य परिग्रहे साधकम्, तदितरस्य वा परिहारे बाधकमस्ति, येनैकतर एव परिगृह्येत, स निश्चयाभाव-रूपो द्वितीयः संकरः। समुच्चयेन संकरस्यैवाक्षेपात्।

उदाहरणम्—

जह गहिरो जह रअणणिब्भरो जह अ णिम्मलच्छाओ।
तह किं विहिणा एसो सरसवाणीओ जलणिही ण किओ॥१८२॥

[ यथा गभीरो यथा रत्ननिर्भरो यथा च निर्मलच्छायः।
तथा किं विधिना एष सरसपानीयो जलनिधिर्न कृतः॥ ]

अत्र समुद्रे प्रस्तुते विशेषणसाम्यादप्रस्तुतार्थप्रतीतेः किमसौ समासोक्तिः, किम् अब्धेरप्रस्तुतस्य मुखेन कस्यापि तत्समगुणतया प्रस्तुतस्य प्रतीतेः इयमप्रस्तुतप्रशंसा इति संदेहः। यथा वा--

नयनानन्ददायीन्दोर्बिम्बमेतत् प्रसीदति।
अधुनापि निरुद्धाशमविशीर्णमिदं तमः॥ १८३ ॥

अत्र किं कामस्योद्दीपकः कालो वर्तते इति भङ्ग्यन्तरेणाभिधानात् पर्यायोक्तम्, उत वदनस्येन्दुबिम्बतया अध्यवसानात् अतिशयोक्तिः, किं वा एतदिति वक्त्रं निर्दिश्य तद्रूपारोपवशात् रूपकम्, अथवा तयोः समुच्चयविवक्षायां दीपकम्, अथवा तुल्य-योगिता, किमु प्रदोषसमये विशेषणसाम्यादाननस्यावगतौ समा-सोक्तिः, आहोस्वित् मुखनैर्मल्यप्रस्तावात् अप्रस्तुतप्रशंसा इति बहूनां संदेहादयमेव संकरः।

यत्र तु न्यायदोषयोरन्यतरस्यावतारः, तत्र एकतरस्य निश्च-यात् न संशयः। न्यायश्च साधकत्वम् अनुकूलता वा, दोषोऽपि बाधकत्वं प्रतिकूलता वा। तत्र

सौभाग्यं वितनोति वक्त्रशशिनो ज्योत्स्नेव हासद्युतिः ॥१८४॥

इत्यत्र मुख्यतया अवगम्यमाना हासद्युतिर्वक्त्रे एवानुकूल्यं भजते इत्युपमायाः साधकम् शशिनि तु न तथा प्रतिकूलेति रूपकं प्रति तस्याः अबाधकता ।

वक्त्रेन्दौ तव सत्ययं यदपरः शीतांशुरभ्युद्यतः ॥ १८५ ॥

इत्यत्रापरत्वमिन्दरोनुगुणं न तु वक्त्रस्य प्रतिकूलमिति रूपकस्य साधकतां प्रतिपाद्यते, न तूपमाया बाधकताम् ।

राजनारायणं लक्ष्मीस्त्वामालिङ्गति निर्भरम् ॥ १८६ ॥

इत्यत्र पुनरालिङ्गनमुपमां निरस्यति, सदृशं प्रति परप्रेयसीप्रयुक्तस्यालिङ्गनस्यासंभवात् ।

पादाम्बुजं भवतु नो विजयाय मञ्जु-
मञ्जीरशिञ्जितमनोहरमम्बिकायाः ॥ १८७ ॥

इत्यत्र मञ्जीरशिञ्जितम् अम्बुजे प्रतिकूलम् असंभवादिति रूपकस्य बाधकम्, न तु पादेऽनुकूलमित्युपमायाः साधकमभिधीयते । विध्युपमर्दिनो बाधकस्य तदपेक्षयोत्कटत्वेन प्रतिपत्तेः । एवमन्यत्रापि सुधीभिः परीक्ष्यम् ।

**स्फुटमेकत्र विषये शब्दार्थालंकृतिद्वयम् ।**
**व्यवस्थितं च**

अभिन्ने एव पदे स्फुटतया यत् उभावपि शब्दार्थालंकारौ व्यवस्थां समासादयतः सोऽप्यपरः संकरः । उदाहरणम्—

स्पष्टोल्लसत्किरणकेसरसूर्यबिम्ब-
विस्तीर्णकर्णिकमथो दिवसारविन्दम् ।
श्लिष्टाष्टदिग्दलकलापमुखावतार-
बद्धान्धकारमधुपावलि संचुकोच ॥ १८८ ॥

अत्र एकपदानुप्रविष्टौ रूपकानुप्रासौ ।

तेनासौ त्रिरूपः परिकीर्तितः ॥ ५५ ॥

तदयमनुग्राह्यानुग्राहकतया संदेहेन एकपदप्रतिपाद्यतया च व्यवस्थितत्वात् त्रिप्रकार एव संकरो व्याकृतः। प्रकारान्तरेण तु न शक्यो व्याकर्तुम्, आनन्त्यात् तत्प्रभेदानाम्।

इति प्रतिपादिताः शब्दार्थोभयगतत्वेन त्रैविध्यजुषोऽलंकाराः।

अलंकाराणां त्रिविधविभागस्य अन्वयव्यतिरेकहेतुत्वम्

कुतः पुनरेष नियमो यदेतेषां तुल्येऽपि काव्यशोभातिशय-हेतुत्वे कश्चिदलंकारः शब्दस्य कश्चिदर्थस्य, कश्चिच्चोभयस्येति चेत्। उक्तमत्र यथा काव्ये दोषगुणालंकाराणां शब्दार्थोभयगतत्वेन व्यवस्थायामन्वयव्यतिरेकावेव प्रभवतः, निमित्तान्तरस्याभावात्। ततश्च योऽलंकारो यदीयान्वयव्यतिरेकावनुविधत्ते, स तदलंकारो व्यवस्थाप्यते इति।

एवं च यथा पुनरुक्तवदाभासः परम्परितरूपकं चोभयोर्भावा-भावानुविधायितया उभयालंकारौ, तथा शब्दहेतुकार्थान्तरन्यास-प्रभृतयोऽपि द्रष्टव्याः। अर्थस्य तु तत्र वैचित्र्यम् उत्कटतया प्रति-भासते इति वाच्यालंकारमध्ये वस्तुस्थितिमनपेक्ष्यैव लक्षिताः।

योऽलंकारो यदाश्रितः स तदलंकार इत्यपि कल्पनायाम् अन्व-यव्यतिरेकावेव समाश्रयितव्यौ, तदाश्रयणमन्तरेण विशिष्टस्याश्रया-श्रयिभावस्याभावात्। इत्यलंकाराणां यथोक्तनिमित्त एव परस्पर-व्यतिरेको ज्यायान्।

अलंकारदोषाणामुक्तदोषेषु अन्तर्भावः

एषां दोषा यथायोगं संभवन्तोऽपि केचन।
उक्तेष्वन्तर्भवन्तीति न पृथक् प्रतिपादिताः ॥५६॥

अनुप्रासदोषाः

तथा हि। अनुप्रासस्य प्रसिद्ध्यभावो वैफल्यं वृत्तिविरोध इति ये त्रयो दोषाः, ते प्रसिद्धिविरुद्धताम् अपुष्टार्थत्वं प्रतिकूलवर्णतां च

यथाक्रमं न व्यतिक्रामन्ति, तत्स्वभावत्वात्। क्रमेणोदाहरणम् —

चक्री चक्रारपङ्क्तिः हरिरपि च हरीन् धूर्जटिर्धूर्ध्वजाग्रान्
अक्षं नक्षत्रनाथोऽरुणमपि वरुणः कूबराग्रं कुबेरः।
रंहः संघः सुराणां जगदुपकृतये नित्ययुक्तस्य यस्य
स्तौति प्रीतिप्रसन्नोऽन्वहमहिमरुचेः सोऽवतात् स्यन्दनो वः॥१८९॥

अत्र कर्तृकर्मप्रतिनियमेन स्तुतिः अनुप्रासानुरोधेनैव कृता, न पुराणैतिहासादिषु तथा प्रतीतेति प्रसिद्धिविरोधः।

भण तरुणि रमणमन्दिरमानन्दस्यन्दिसुन्दरेन्दुमुखि।
यदि सल्लीलोल्लापिनि गच्छसि, तत् किं त्वदीयं मे॥ १९०॥
अनणुरणन्मणिमेखलमविरतशिञ्जनमञ्जुमञ्जीरम्।
परिसरणमरुणचरणे रणरणकमकारणं कुरुते॥ १९१॥

अत्र वाच्यस्य विचिन्त्यमानं न किंचिदपि चारुत्वं प्रतीयते इत्यपुष्टार्थतैवानुप्रासस्य वैफल्यम्।

अकुण्ठोत्कण्ठया पूर्णमाकण्ठं कलकण्ठि माम्।
कम्बुकण्ठ्याः क्षणं कण्ठे कुरु कण्ठार्तिमुद्धर॥ १९२॥

अत्र शृङ्गारे परुषवर्णाडम्बरः पूर्वोक्तरीत्या विरुद्धते इति परुषानुप्रासोऽत्र प्रतिकूलवर्णतैव वृत्तिविरोधः।

### यमकदोषः

यमकस्य पादत्रयगतत्वेन यमनमप्रयुक्तत्वं दोषः। यथा—

भुजंगमस्येव मणिः सदम्भा ग्राहावकीर्णेव नदी सदम्भाः॥
दुरन्ततां निर्णयतोऽपि जन्तोः कर्षन्ति चेतः प्रसभं सदम्भाः॥१९३॥

### उपमादोषाः

उपमायाम् उपमानस्य जातिप्रमाणगतन्यूनत्वम् अधिकता वा तादृशी अनुचितार्थत्वं दोषः। धर्माश्रये तु न्यूनाधिकत्वे यथाक्रमं हीनपदत्वमाधिकपदत्वं च न व्यभिचरतः। क्रमेणोदाहरणम्—

चण्डालैरिव युष्माभिः साहसं परमं कृतम् ॥ १९४ ॥
वह्निस्फुलिङ्ग इव भानुरयं चकास्ति ॥ १९५ ॥

अयं पद्मासनासीनश्चक्रवाको विराजते ।
युगादौ भगवान् वेधा विनिर्मित्सुरिव प्रजाः ॥ १९६ ॥

पातालमिव नाभिस्ते स्तनौ क्षितिधरोपमौ ।
वेणीदण्डः पुनरयं कालिन्दीपातसंनिभः ॥ १९७ ॥

अत्र चण्डालादिभिरुपमानैः प्रस्तुतोऽर्थोऽत्यर्थमेव कदर्थित इत्यनुचितार्थता ।

स मुनिर्लाञ्छितो मौञ्ज्या कृष्णाजिनपटं वहन् ।
व्यराजन्नीलजीमूतभागाश्लिष्ट इवांशुमान् ॥ १९८ ॥

अत्रोपमानस्य मौञ्जीस्थानीयस्तडिल्लक्षणो धर्मः केनापि पदेन न प्रतिपादित इति हीनपदत्वम् ।

स पीतवासाः प्रगृहीतशार्ङ्गो मनोज्ञभीमं वपुराप कृष्णः ।
शतह्रदेन्द्रायुधवान् निशायां संसृज्यमानः शशिनेव मेघः ॥१९९॥

अत्रोपमेयस्य शङ्खादेरनिर्देशे शशिनो ग्रहणमतिरिच्यते इत्यधिकपदत्वम् ।

लिङ्गवचनभेदोऽपि उपमानोपमेययोः साधारणं चेत् धर्ममन्यरूपं कुर्यात्, तदा एकतरस्यैव तद्धर्मसमन्वयावमतेः सविशेषणस्यैव तस्योपमानत्वमुपमेयत्वं वा प्रतीयमानेन धर्मेण प्रतीयते इति प्रक्रान्तस्य अर्थस्य स्फुटमनिर्वाहादस्य भग्नप्रक्रमरूपत्वम् ।

यथा—

चिन्तारत्नमिव च्युतोऽसि करतो धिङ्मन्दभाग्यस्य मे ॥२००॥

सक्तवो भक्षिता देव शुद्धाः कुलवधूरिव ॥ २०१ ॥

यत्र तु नानात्वेऽपि लिङ्गवचनयोः सामान्याभिधायि पदं स्वरूपभेदं नापद्यते, न तत्रैतद्दूषणावतारः । उभयथापि अस्य अनुगमक्षमस्वभावत्वात् । यथा—

गुणैरनर्घ्यैः प्रथितो रत्नैरिव महार्णवः ॥ २०२ ॥

तद्वेषोऽसदृशोऽन्याभिः स्त्रीभिर्मधुरताभृतः ।
दधते स्म परां शोभां तदीया विभ्रमा इव ॥ २०३ ॥

कालपुरुषविध्यादिभेदेऽपि न तथा प्रतीतिरस्खलितरूपतया विश्रांतिमासादयतीत्यसावपि भग्नप्रक्रमतयैव व्याप्तः । यथा—

अतिथिं नाम काकुत्स्थात् पुत्रमाप कुमद्वती ।
पश्चिमाद् यामिनीयामात् प्रसादमिव चेतना ॥२०४॥

अत्र चेतना प्रसादमाप्नोति न पुनरापेति कालभेदः ।

प्रत्यग्रमज्जनविशेषविविक्तमूर्तिः
कौसुम्भरागरुचिरस्फुरदंशुकान्ता ।
विभ्राजसे मकरकेतनमर्चयन्ती
बालप्रवालविटपप्रभवा लतेव ॥२०५॥

अत्र लता विभ्राजते न तु विभ्राजसे इति संबोध्यमाननिष्ठस्य परभागस्य असंबोध्यमानविषयतया व्यत्यासात् पुरुषभेदः ।

गङ्गेव प्रवहतु ते सदैव कीर्तिः ॥२०६॥

इत्यादौ च गङ्गा प्रवहति न तु प्रवहतु इति अप्रवृत्तप्रवर्तनात्मनो विधेः । एवं जातीयकस्य चान्यस्यार्थस्य उपमानगतस्यासम्भवाद् विध्यादिभेदः ।

ननु समानम् उच्चारितं प्रतीयमानं वा धर्मांतरमुपादाय पर्यवसितायाम् उपमायाम् उपमेयस्य प्रकृतधर्माभिसम्बन्धान्न कश्चित् कालादिभेदोऽस्ति । यत्राप्युपात्तेनैव सामान्यधर्मेण उपमा अवगम्यते, यथा 'युधिष्ठिर इवायं सत्यं वदतीति'–तत्र युधिष्ठिर इव सत्यवाद्ययं सत्यं वदतीति प्रतिपत्स्यामहे । सत्यवादी सत्यं वदतीति च न पौनरुक्त्यम् आशङ्कनीयम् । रैपोषं पुष्णातीतिवत्, युधिष्ठिर इव सत्यवदनेन सत्यवादी अयम्–इत्यर्थावगमात् ।

सत्यमेतत् । किंतु स्थितेषु प्रयोगेषु समर्थनमिदं, न तु सर्वथा निरवद्यम्, प्रस्तुतवस्तुप्रतीतिव्याघातादिति सचेतस एवात्र प्रमाणम् ।

असादृश्यासंभवावप्युपमायाम् अनुचितार्थतायामेव पर्यवस्यतः। यथा—

ग्रथ्नामि काव्यशशिनं विततार्थरश्मिम् ॥ २०७ ॥

अत्र काव्यस्य शशिना अर्थानां च रश्मिभिः साधर्म्यं कुत्रापि न प्रतीतमित्यनुचितार्थत्वम्।

निपेतुरास्यादिव तस्य दीप्ताः शरा धनुर्मण्डलमध्यभाजः।
जाज्वल्यमाना इव वारिधारा दिनार्धभाजः परिवेषिणोऽर्कात् ॥२०८॥

अत्रापि ज्वलन्त्योऽम्बुधाराः सूर्यमण्डलात् निष्पतन्त्यो न संभवन्तीत्युपनिबध्यमानोऽर्थोऽनौचित्यमेव पुष्णाति।

### उत्प्रेक्षादोषः

उत्प्रेक्षायामपि संभावनं ध्रुवेवादय एव शब्दा वक्तुं सहन्ते, न यथाशब्दोऽपि। केवलस्यास्य साधर्म्यमेव प्रतिपादयितुं पर्याप्तत्वात्। तस्य चास्यामविवक्षितत्वादिति तत्राशक्तिरस्यावाचकत्वं दोषः। यथा—

उद्ययौ दीर्घिकागर्भान्मुकुलं मेचकोत्पलम्।
नारीलोचनचातुर्यशङ्कासंकुचितं यथा ॥ २०९ ॥

### अर्थान्तरन्यासदोषः

उत्प्रेक्षितमपि तात्त्विकेन रूपेण परिवर्जितत्वात् निरुपाख्यप्रख्यम् तत्समर्थनाय यत् अर्थान्तरन्यासोपादानम् तत् आलेख्यमिव गगनतलेऽत्यन्तमसमीचीनमिति निर्विषयत्वमेतस्य अनुचितार्थतैव दोषः। यथा—

दिवाकराद् रक्षति यो गुहासु लीनं दिवाभीतमिवान्धकारम्।
क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैःशिरसामतीव ॥ २१० ॥

अत्राचेतनस्य तमसो दिवाकरात् त्रास एव न संभवतीति कुत एव तत्प्रयोजितमद्रिणा परित्राणम्। संभावितेन तु रूपेण प्रतिभासमानस्यास्य न काचिदनुपपत्तिरवतरतीति व्यर्थ एव तत्समर्थनायां यत्नः।

साधारणविशेषणवशादेव समासोक्तिरनुक्तमपि उपमानविशेषं प्रकाशयतीति तस्यात्र पुनरुपादाने प्रयोजनाभावात् अनुपादेयता यत्, तत् अपुष्टार्थत्वं पुनरुक्तता वा दोषः । यथा—

स्पृशति तिग्मरुचौ ककुभः करैर्दयितयेव विजृम्भिततापया ।
अतनुमानपरिग्रहया स्थितं रुचिरया चिरयापि दिनश्रिया ॥२११॥

अत्र तिग्मरुचेः ककुभां च यथा सदृशविशेषणवशेन व्यक्तिविशेषपरिग्रहेण च नायकतया नायिकात्वेन च व्यक्तिः, तथा ग्रीष्मदिवसश्रियोऽपि प्रतिनायिकात्वेन भविष्यतीति किं दयितयेति स्वशब्दोपादानेन ।

श्लेषोपमायास्तु स विषयः, यत्रोपमानस्योपादानमन्तरेण साधारणेष्वपि विशेषणेषु न तथा प्रतीतिः । यथा--

इयं च पल्लवाताम्रभास्वत्करविराजिनी ।
प्रभातसंध्येवास्वापफललुब्धेहितप्रदा ॥ २१२ ॥

अप्रस्तुतप्रशंसादोषः

अप्रस्तुतप्रशंसायामपि उपमेयम् अनयैव रीत्या प्रतीतं न पुनः प्रयोगेण कदर्थतां नेयम् । यथा—

आहूतेषु विहंगमेषु मशको नायान् पुरो वार्यते
मध्येवारिधि वा वसंस्तृणमणिर्धत्ते मणीनां रुचम् ।
खद्योतोऽपि न कम्पते प्रचलितुं मध्येऽपि तेजस्विनां
धिक्सामान्यमेचतनं प्रभुमिवानामृष्टतत्त्वान्तरम् ॥ २१३ ॥

अत्र अचेतनस्य प्रभोरप्रस्तुतविशिष्टसामान्यद्वारेणाभिव्यक्तेरयुक्तमेव पुनः कथनम् ।

तदेतेऽलंकारदोषाः यथासंभविनोऽन्येऽप्येवंजातीयकाः पूर्वोक्तयैव दोषजात्या अन्तर्भाविताः न पृथक् प्रतिपादनमर्हन्ति ।

इति संपूर्णमिदं काव्यलक्षणम् ।

इत्येष मार्गो विदुषां विभिन्नोऽप्यभिन्नरूपः प्रतिभासते यत् ।
न तद् विचित्रं यदमुत्र सम्यग्विनिर्मिता संघटनैव हेतुः ॥ २१४ ॥

इति काव्यप्रकाशेऽर्थालंकारनिर्णयो नाम दशम उल्लासः ।

समाप्तश्चायं काव्यप्रकाशः ।

मराठी ग्रंथ संग्रहालय, ठाणे. ग्रंथालय
अनुक्रम ७७६६२ वि: काव्य
ग्रंथांक २०३५ नोंद दि. २०।३।७९

मराठी ग्रंथ संग्रहालय ठाणे
दा. क्र. १६९६४
संदर्भ शाखा (स्थळ प्रत)

REFBK-0016964
REFBK-0016964

पुस्तके

प्राथमिक व माध्यमिक शाळा

आणि

विविध महाविद्यालये

-कला, शास्त्र, वाणिज्य, तांत्रिक, शेती...

व

विविध शिक्षण-संस्था

-प्रशिक्षण, चित्रकला...

यांमधील

विद्यार्थी व वाचनालये

तसेच

चिकित्सक वाचक

यासाठी उपयुक्त

हिन्दी, मराठी, इंग्रजी, ... भाषेतील

सर्व प्रकारची

शालेय, ललित, धार्मिक...

पुस्तके

मिळण्याचे प्रमुख ठिकाण

महाराष्ट्र ग्रंथ भांडार,

महाद्वार रस्ता, कोल्हापूर.